RNI No. : DELSAN/2011/38660 ISSN 2321 - 4937 DL(E)-20/5534/2024-26

Posting Date.:
4-5, 19-20 of Every Month

॥ ओ३म् ॥

यथा काष्ठं च काष्ठं च समेयातां महार्णवे ।
समेत्य च व्यपेयातां तद्वद् भूतसमागमः॥
( महाभारत, शान्तिपर्व - 25/5 )
'पञ्चभूतात्मके देहे सत्त्वे राजसतामसे ।
कमभिष्टुवते चायं कं वाऽऽक्रोशति किं वदन् ॥'
( महाभारत-शान्तिपर्व - 28.36 )

सत्यनिष्ठा जयेल्लेखनी निर्भया

# संस्कृत-संवादः

पाक्षिकं समाचारपत्रम्

॥ ओ३म् ॥

यन्नवे भाजने लग्नस्संस्कारो नान्यथा भवेत्!
हितोपदेशः

असत्यवचनं प्राज्ञः प्रमादेनापि नो वदेत्।
श्रेयांसि येन भज्यन्ते वात्य एव महाद्रुमाः ॥
( योगशास्त्र - 02/57 )

संपादकीयकार्यालयः ए-२/३२, वजीराबाद मार्गः, भजनपुरा, देहली-११००५३, दूरभाषः ९३११०८६७५१
ई-मेलः sanskritsamvad@gmail.com वेवसाइटः www.sanskritsamvad.com
मूल्यम्-रू. १०/-

卐 वर्षम्-१४ 卐 अंकः-०१ ( ३१३ ) नवदेहली 卐 १ जुलाईमासः २०२४तः १५ जुलाईमासः २०२४ पर्यन्तम् 卐 विक्रमसंवत्-२०८१ 卐 सृष्टिसंवत्-१,९६,०८,५३,१२४ 卐 पृष्ठम्-८

## नालन्दा अन्ताराष्ट्रियविश्वविद्यालय : भारतीयज्ञानस्य शिक्षायाश्च वैश्विककेन्द्रम्-प्रधानमन्त्री नरेन्द्रमोदी

नालंदा - बिहार राज्यस्य राजगीरे स्थितायाः नालंदायाः प्राचीनभग्नावशेषसमीपे नालंदा अंतरराष्ट्रीय विश्वविद्यालयस्य नूतन परिसरं प्रधानमंत्री उद्घाटितवान् । नालंदा विश्वविद्यालयं भारतीयं शैक्षणिक न्यासं



सांस्कृतिकविनिमयस्य प्रतीकभूतं च बोधयन् प्रधानमंत्री कथितवान् यन्नालंदा एतत् सत्यम् उद्घोषयति यत् पुस्तकानि यद्यपि ज्वलितानि परंतु ज्ञानं कदापि नंष्टु न शक्यते।

नालंदा स्थित विश्वविद्यालयः भारतीय-अस्मिता परिचायकः । यत्र परस्परं सम्मानं, जीवन मूल्य मंत्रः गौरव गाथा च विद्यतेस ज्ञातव्यं यत् 1199 तमे वर्षे वैदेशिकेन आक्रांत्रा बख्तियार खिलजिना अस्य प्राचीन

शेषभागःतृतीयेपुटे




## स्वस्थ-भारतस्य स्वस्थविश्वस्य च संकल्पेन सह पतंजलियोगपीठे दशमः अन्ताराष्ट्रियः योगदिवसः समाचरितः

### योगः पूर्णविश्वस्मै भारतस्य सर्वश्रेष्ठं वरदानम्-आचार्यः बालकृष्णः

हरिद्वारम् पतंजलि वैलनेस, पतंजलि योगपीठ-2 स्थिते योगभवन सभागारे कार्यक्रमेस्मिन् स्वामी रामदेवः अकथयत् यत् योगेन योगमूलिकया च इंटीग्रेटिड ट्रीटमेंट प्रणाल्या साध्य-असाध्य रोगाः समापयितुं




शक्ताः । योगः, प्राणायामः च सहजतया जीवनं सार्थकं कुर्वते। योगः अस्मद्दैनन्दिनस्य अंशभूतः , समस्त समास्यानां समाधानं च, योगः आत्मानुशासनम।, आत्मदर्शनम्, आत्म उपचारः आत्म साक्षात्कारः च वर्तते। पूर्णजगतः वैचारिकाणां, राजनैतिकानाम्, आर्थिकानां च संघर्षाणां समाधानमपि योगयुक्तं जीवनमेव।

आचार्यः बालकृष्णः अभाषत यत् योगः पूर्ण विश्वस्मै भारतेन दत्तं सर्वश्रेष्ठं वरदानम्। योगः जन-जन पर्यन्तं प्रापय्य तेषां जीवने क्रियात्मकरूपं प्रतिष्ठापयितुं पूज्य स्वामिनः सान्निध्ये वयं योग महोत्सवं समाचरन्तः स्मः। प्रतिदिनं रोगिणां संख्या वर्धते, तस्य एकमात्रं समाधानं योगे निहितम् । सनातन वैदिक परम्परां मन्वानाः अस्मद्वैज्ञानिकाः ऋषयः अस्मान् योग विधया योजितवन्तः। योगः न किञ्चन मतं, पंथाः, सम्प्रदायं च नास्ति। योगस्तु जातिसम्प्रदायराजनैतिकबन्धनान्मुक्तः एकं सार्वभौमिकं वैज्ञानिकं सर्वहितकारि विज्ञानम् अस्ति।

तत्र पतंजलि योग समिति हरिद्वारं रुड़की इत्यनयोः तत्वाधाने समीपस्थानां प्रायः 200 ग्रामाणां वासिनः योगसत्रे भागम् अगृह्णन्।

पतंजलि महिला योग समितेः मुख्य केन्द्रीय प्रभारिणी साध्वी देवप्रिया, मुख्य केन्द्रीय प्रभारी राकेशः 'भारतः', स्वामी परमार्थदेव क्रय समिति अध्यक्षा भगिनी अंशुल, संप्रेषण विभाग प्रमुखा पारूल, पीआरआई प्रमुख वैज्ञानिकः डॉ. अनुराग वार्ष्णेयः, मुख्य महाप्रबंधकः (ट्रस्ट) ब्रिगेडियर टी. सी. मल्होत्रा, मानव संसाधन प्रमुखः श्री तरूण राजपूतः, पतंजलि आयुर्वेद महाविद्यालयस्य प्राचार्यः प्रो. अनिल यादवः, पतंजलि आयुर्वेद चिकित्सालयस्य उपाधीक्षकः डॉ. अरूण पाण्डेयः, स्वामी बजरंगदेवः, स्वामी आर्षदेवः, स्वामी ईशदेवः इत्येतैः सहिताः पंतजलि योगपीठेन सम्बद्धाः समस्त एकांशिकाः तत्प्रमुखाः, अधिकारिणः, कर्मचारिणः पतंजलि संन्यासाश्रमस्य संन्यासिनः संन्यासिन्यश्च उपस्थिताः आसन्।

## आकाशवाण्याः संस्कृत-वार्त्ता-प्रसारणस्य स्वर्णजयन्ती-वार्षिकोत्सवः

ऐषमः जून-मासे ऊनत्रिन्शत्तमे दिनाङ्के सम्पूर्तिमेति। अस्मिन् ऐतिहासिके शुभावसरे अहं बलदेवानन्दसागरः सर्वेषां संस्कृतप्रेमिणां हृदयेन अभिनन्दनं करोमि, आधुनिकसंस्कृतपत्रकारितायाः प्रगतेः प्रचारस्य च शुभकामनाः प्रकटयामि।

अस्य प्रसारणस्य प्रारम्भिकप्रसारकेषु अन्यतमः इति मम सौभाग्यम्, अस्य आधारेण अस्मिन् शुभावसरे संस्कृतस्य विदुषः, छात्रान्, प्रेमिणः, समर्पितान् कार्यकर्तृन् च आदरपूर्वकं वक्तुमिच्छामि यत् साम्प्रतं वयं संस्कृतभाषायाः संस्कृतशिक्षणस्य च स्वर्णिमावसरं प्राप्तवन्तः। मम अनुभवस्य आधारेण अहं महता विश्वासेन वक्तुं शक्नोमि यत् कृत्रिमबुद्धेः, आधुनिकसूचनाप्रौद्योगिक्याः, अन्तर्जालसुविधायाः च कारणात् संस्कृतपत्रकारितायाः क्षेत्रे कार्यं सुकरं जातम्। संस्कृतभाषायाम् अनुवादः अपि सुगमः अभवत् । अद्य पञ्चाशत्वर्षाणां यात्रायाः समीक्षां कुर्वन् संस्कृतप्रसारणस्य, संस्कृतपत्रकारितायाः, संस्कृतसाहित्यस्य च कार्यम् पूर्वापेक्षया सुकरं जातम् इति अहम् अनुभवामि। यदा अहं पश्यामि यत् अद्यतनयुवकाः संस्कृतप्रेमिणः च संस्कृतभाषानिबद्धानि दृश्यपटलानि, श्रव्य-पटलानिच सामाजिकसञ्चारमाध्यमेषु संस्थाप्य, स्वीयाः भावनाः विचारान् अनुभवान् च संस्कृतमाध्यमेन प्रचारन्ति, तदा अलौकिकम् आनन्दं सुखं च अनुभवामि। शुभावसरेस्मिन् भवद्भ्यः सर्वेभ्यः श्रोतृभ्यः दर्शकेभ्यः च शुभकामनाः। नमस्कारः-धन्यवादः।

-बलदेवानन्दसागरः

# रामायणम् अधिकारस्य कर्तव्यबोधस्य च शिक्षां ददाति

(प्रो.प्रदीपकुमार शर्मा, संस्थापक-कुलपतिः महाराजा-सुहेलदेव-राज्य-विश्वविद्यालयः, आजमगढ-उत्तरप्रदेशः)

ज्येष्ठशुक्ल-निर्जलैकादश्यां षष्टी श्रीमद्रामाश्रिता वर्चुवल-राष्ट्रिय-व्याख्यानगोष्ठी सुसम्पन्ना।







महाराजा-सुहेलदेव-राज्य-विश्वविद्यालयः, आजमगढः, राजकीयमहाविद्यालयः, आर.एस.पुरा जम्मू, एवं चातुर्वेद-संस्कृतप्रचार संस्थानम् काशी उ.प्र. इत्तयेतेषां संयुक्ततत्वावधाने सम्पन्नायां गोष्ठ्यां मुख्यातिथिः प्रो.प्रदीपकुमारशर्ममहोदयः सम्बोधितवान् यत् महर्षिवाल्मीकिविरचितं रामायणं न केवलं राष्ट्रस्य अपितु अन्ताराष्ट्रियस्य महत्त्वस्य विषयोस्ति। अत्र भगवतो रामस्य चरितानुशीलनेन धैर्य, धर्म, चरित्रम् अनुशासनञ्च सहजतया प्राप्तुं शक्यते। रामायणम् अधिकारस्य कर्तव्यबोधस्य च शिक्षां ददाति । अस्माकं व्यवहारः मर्यादापूर्णः स्यात्, अतः सर्वैः रामायणं पठनीयम्।

विशिष्टवक्ता डॉ. अरविन्दकुमारतिवारी वर्यः 'विश्वनायको रामः'विषयमाश्रित्य व्याख्यातवान् यद् भारतस्य विशालायां संस्कृत्यां केवलं रामः नरोत्तमः अस्ति, पुरुषोत्तमः अस्तीति विश्वनायकत्वं पुष्णाति। रामस्य चरितानुशीलनं सामान्यं नैवापितु अमरकथोपदेशवदस्ति। यथा जीवने वायुं तत्त्वं जलमन्नादिकं तथैव रामः प्राणतत्त्वमस्ति।

मुख्यवक्त्री प्रो.मञ्जूलता शर्मा वर्या 'ब्रजलोकगीतेषु रामः' विषयमाश्रित्य ब्रजगीतानां माध्यमेन अत्यन्तं भावपूर्णं व्याख्यानं कृतवती। आयोजनपक्षतः विश्वविद्यालयीयस्य संस्कृतविभागसंयोजिका, गोष्ठ्याः समन्वयिका प्रो. वन्दना पाण्डेया जी समेषामतिथीनां परिचयपूर्वकं स्वागतं व्याहृतवती प्रास्ताविकीञ्च ज्ञापितवती।

जम्मूतः प्राचार्या डॉ. रजनीभगत वर्या रामायणं मानवानां समाजशास्त्रमस्तम् उक्तवती। संयुक्तसंयोजकः डॉ. सञ्जीवोपाध्यायः समागतानां समेषाम् आभारं प्रकाशितवान्। अन्ते मातावैष्णोदेवी मन्दिरतः शास्त्री तृप्तशर्मा शुभकामनासन्देशपूर्वकं शान्तिपाठं कृतवान्।

सञ्चालनं संगोष्ठीसंयोजकः डॉ. चन्द्रकान्तदत्तशुक्लः सम्पादितवान्।

अवसरेस्मिन् प्रो.मयूरी बेन भाटिया, प्रो.निरूपमा त्रिपाटी, डॉ. गीता शुक्ला, डॉ. आभा द्विवेदी, प्रो.सुनीता जायसवाल, डॉ. सर्वेश शाण्डिल्य, डॉ.अवनीन्द्रपाण्डेयः, डॉ. किरन आर्या, डॉ. विवेकयादवः, डॉ. रमेश चक, डॉ. शिखा रानी, डॉ. कौशलेन्द्र त्रिपाठी, डॉ.खगेन्द्र मिश्रः, उमाजी पाटिल, अपर्णा पाण्डेया, डॉ. अम्बरीशमिश्रप्रभृतयो नैके विद्वांसः, शोधार्थिनः श्रोतारश्च सम्मिलिताः आसन्।

# संस्कृतभाषायाः एवञ्च योगस्य ज्ञानं आवश्यकम् - शुभम द्विवेदी

(वार्ताहरः लक्ष्मीनारायण राजपूतः)

वर्तमानसमये संस्कृतभाषायाः प्रशिक्षणकार्यं बहुभिः संस्थाभिः क्रियते परञ्च उत्तरप्रदेशसंस्कृतसंस्थानेन श्लाघ्नीया कक्षा सञ्चाल्यमाना भवति। संस्थानेनानेन न केवलं आभाषिकं संस्कृतभाषाशिक्षणम् अपितु गृहे- गृहे -संस्कृतम्, योग-पौरोहित्याद्यनेकयोजनाभिः संस्कृतभाषायाः विकासः क्रियते। संस्कृतसंस्थानेन सञ्चालितासु कक्षासु मुख्यरूपेण प्रथमस्तरीयाः, द्वितीयस्तरीयाः सम्भाषणकक्षाः एव वर्तन्ते । प्रतिमासं विंशतिदिवसीयसंस्कृत-भाषा-शिक्षण-कक्षायामेकं प्रेरणा -सत्रस्य आयोजनं भवति, एतस्मिन् सत्रे प्रशिक्षवः छात्राश्च विदुषामुद्बोधनमाशीर्वचनञ्च प्राप्नुवन्ति। अस्य जूनमासस्य २८ तमे दिनाङ्के प्रथम-द्वितीयस्तरीयकक्षाणां समवेत रूपेण प्रेरणासत्रस्य आयोजनमभवत्। यस्मिन् कार्यक्रमे प्रशिक्षुः अनुरागद्विवेदी वैदिकमङ्गलाचरणं कृतवान्। तदनन्तरं प्रशिक्षुणा हरिवल्लभशरणेन संस्थानगीतिका प्रस्तुता। अतिथिपरिचयपुरस्सरं वाचिकस्वागतं योजनायाः समन्वयिका सुश्रीराधामहोदया कृतवती। अथ च वृत्तकथनं संस्थानस्य प्रशिक्षकेण श्रीगोपालमिश्रवर्येण कृतम्। तदनन्तरं ऑनलाइनमाध्यमेन पठन्ती विजया उल्लास गोखले महोदया संस्कृतेन कक्षानुभवं उक्तवती। तत्पश्चात् प्रेरिकावर्यया देशभक्तिगीतं कृतम् । पुनः प्रशिक्षुणी सुनीति गुजला योगकेन्द्रितमनुभवकथनं कृतवती। अस्मिन् कार्यक्रमे मुख्यवक्तृरूपेण श्रीमन्तः शुभमद्विवेदिवर्याः उत्तरप्रदेशसंस्कृतसंस्थानस्य कुशीनगर जनपदस्य योगप्रशिक्षकाः समागताः आसन्। स्वोद्बोधने महोदयैरुक्तं यत् प्राचीनानि निखिलानि शास्त्राणि पुराणानि वेदवेदाङ्गानि एवञ्च योगं ज्ञातुं संस्कृतभाषा अवश्यं सर्वैरपि पठितव्या । संस्कृतभाषा आधुनिककाले वृत्तौ अपि आगच्छेत्, तथा प्रयासः करणीयः तथा च अस्माकं पुरातनज्ञानस्य पुनः अन्वेषणं बोधः परिज्ञानं च आवश्यकं वर्तते, तदर्थं संस्कृतसेना आवश्यकी अस्ति । वर्तमानसमये यदि वयं अस्माकं स्वास्थ्यं सम्यक् इच्छामः चेत् तस्य कृते योगम् अत्यावश्यकं वर्तते। कार्यक्रमेऽस्मिन् उत्तरप्रदेश- संस्कृतसंस्थानस्य प्रमुखसचिवः जितेन्द्रकुमारः, निदेशकः विनयश्रीवास्तवः, सर्वेक्षकः श्रीमान् भगवानसिंह- चौहानमहोदयः, प्रशिक्षणप्रमुखः श्रीसुधिष्ठमिश्रः, प्रशिक्षण -समन्वयकाः धीरजमैठानी दिव्यरंजनः राधा शर्मा च उपस्थिताः आसन् । कार्यक्रमस्य सञ्चालनं संस्थानस्य प्रशिक्षकेण गोपालकृष्णवर्येण कृतम् । मीटिंगसञ्चालनम् गणेशदत्तवर्येण कृतम्। धन्यवादज्ञापनं प्रशिक्षकेण डा० सत्यप्रकाशमिश्रवर्येण कृतम् । रजनीशतिवारिमहोदयः शान्तिमन्त्रं कृत्वा सङ्गोष्ठ्याः समापनं कृतवान्। कार्यक्रमेऽस्मिन् संस्थानस्य सर्वे प्रशिक्षकाः सर्वे प्रशिक्षवश्च उपस्थिता आसन्। न केवलं अध्येतारः, बालकाः, पुरुषाः एतस्यां कक्षायां पठितुं शक्नुवन्ति, अपितु गृहिण्यः दिव्यचक्षवः अपि कक्षां कर्तुं शक्नुवन्ति। एतस्मै भवन्तः भवत्यश्च शीघ्रमत्र पञ्जीकरणं कुर्वन्तु -https://sanskritsambhashan.com/ ।

# 'योगः' स्वास्थ्य-मानवजीवनस्य आधारः-अमितालोहनी

## (रामनगर-महाविद्यालये अन्ताराष्ट्रिय-योगदिवसे विविधाः कार्यक्रमाः आयोजिताः)

वार्ताहरः- डॉ. मूलचन्द्र शुक्लः

रामनगरम्।योगः स्वस्थ्य-मानव- जीवनस्य आधारः इति अन्ताराष्ट्रिय-योगदिवस-समारोहे मुख्यातिथिः राज्य-महिला- आयोग-




उत्तराखण्डस्य पूर्व-उपाध्यक्षा अमिता लोहनी महोदया उक्तवती। पीएनजी राजकीय-स्नातकोत्तर-महाविद्यालय-रामनगरे दशमः अन्ताराष्ट्रिय-योगदिवसः सोत्साहं हर्षोल्लासपूर्वकं च समाचरितः। योग-वैकल्पिक-चिकित्सा-विभागद्वारा आयोजित-समारोहस्य प्रारम्भः कार्यक्रमस्य अध्यक्षः प्राचार्यः प्रोफे.एम.सी.पाण्डेमहोदयः, मुख्य-अतिथिः राज्य-महिला- आयोग-उत्तराखण्डस्य पूर्व-उपाध्यक्षा अमिता लोहनीमहोदया,कार्यक्रमसंयोजकः डॉ.सुमन कुमारः,समन्वयकः योगविभाग-प्रभारी डॉ.मूलचन्द्र शुक्लः, डॉ.दीपक खाती च संयुक्त-रूपेण मातुः सरस्वत्याः समक्षं दीपप्रज्ज्वलनपूर्वकं कृतः ।अत्र योगाभ्यासेन सह नैके कार्यक्रमाः समायोजिताः। तत्र प्रातःकालात् षड्वादनात् पूर्वाभ्यासो विहितः, सरस्वति-वन्दनानन्तरं महाविद्यालयस्य ऑडिटोरियम इत्यत्र सामूहिक- योगाभ्यासः सप्त वादनात् च कारितः।योगाभ्यास-सत्रे योग- प्रशिक्षकः डॉ.मुरलीधर कापड़ी महोदयः योग-वैकल्पिक-चिकित्साविभागः, एनसीसी, एनएसएस,रोवर रेंजर्स,नमामि गंगे इत्यादि-सहयोगि-छात्र-छात्राभिः सह स्थानीय-नागरिकान् अपि योगासनं कारितवान।अनेन मानव- जीवने योगस्य महत्त्वम् , सात्विकभोजनम् , सकारात्मक- चिन्तनम्, व्यक्तित्वविकासः इत्यादिविषयेषु विस्तरेण प्रशिक्षणं प्रदत्तम। मञ्च-सञ्चालकः डॉ.डी.एन.जोशी महोदयः समस्त-आगत-अतिथीनां योगप्रशिक्षुणां च अभिनन्दनं पुरस्करोति। अस्मिन् कार्यक्रमे विशिष्ट-अतिथिः रामनगरस्थ-ब्लॉकप्रमुखा रेखा रावत,सांसद-प्रतिनिधिः इन्दर सिंह रावत, राज्य-कर-अधिकारी मितेश्वर आनन्दः, समाजसेवी गणेश रावत इत्यादयः गणमान्याः योगाय जीवनोपयोगी उक्तवन्तः । एते योग एवं वैकल्पिक-चिकित्सा- विभागीय-विद्यार्थिद्वारा कृतयोगासनैः सह प्रस्तुताः योगप्रस्तुतयः प्रशस्ताः प्रशंसनीयाश्च उक्तवन्तः। योगाभ्याससत्रे पूर्वछात्र अमित लोहनी द्वारा बांसुरी-वादनेन सर्वेपि मन्त्रमुग्धाः सञ्जाताः। अस्मिन् उपलक्ष्ये मईमासस्य 20 दिनाङ्कतः जून मासस्य 20 दिनाङ्कं 2024 यावत् श्आओ हम सब योग करेंश अर्थात् आगच्छन्तु वयं योगं कुर्याम इति जनजागरण-अभियाने उत्कृष्ट-भूमिकानिर्वहनार्थं योग- प्रशिक्षकाय डॉ.मुरलीधर कापड़ी महोदयाय प्रशस्तिपत्रेण स्मृतिचिह्नप्रदानेन च अतिथयः सभाजयन्ति ।पुरस्कारवितरणकार्यक्रमे मनीष कुमारः, हरजीत सिंहः, सपना शर्मा,सपना पाण्डेया,ज्योति बिष्टः,विनीता सैनी,मीनाक्षी रौतेला,सूरज पाण्डेयः, रितिक कड़ाकोटी, रेनू, सोनी,मधु, इत्यादयः योगविभागीयाः विद्यार्थिनः स्मृतिचिह्नद्वारा प्रमाणपत्र-प्रदानेन च सभाजिताः। मञ्चसञ्चालनं डॉ.डी.एन.जोशी महोदयेन कृतम। अस्मिन्नवसरे योग एवं वैकल्पिक-चिकित्सा-विभागस्य प्रभारी डॉ.मूलचन्द्र शुक्लः, पीजी डिप्लोमा योगस्य प्रभारी डॉ.सुमन कुमारः, नमामि गङ्गे नोडल अधिकारी डॉ.भावना पन्तः,एनसीसी प्रभारी लेफ्टिनेंट डी.एन.जोशी,लेफ्टिनेंट कृष्णा भारती, डॉ.दीपक खाती,एनएसएस प्रभारी डॉ.सुरेश चन्द्रा,डॉ. जे.पी.त्यागी इत्यादयः प्राध्यापकाः, मुख्य-प्रशासनिक-अधिकारी गोविन्द सिंह जंगपांगी, प्रकाश चन्द्रः, सुशील कुमारः,छात्र-छात्राः, भूपेन्द्र खाती इत्यादयः अनेके स्थानीय-नागरिकाश्च उपस्थिताः आसन्।

# एकविंशतिदिवसीया कार्यशाला

डॉ.प्रदीपकुमारपाण्डेयः

भोपाल। भारतसर्वकारस्य शिक्षामन्त्रालयेन सञ्चालिते केन्द्रीयसंस्कृतविश्वविद्यालयस्य भोपालपरिसरे जूनमासस्य त्रिदिनाङ्कतः आरभ्य जूनमासस्य त्रयोविंशत दिनाङ्कं यावत् रङ्गमञ्चस्य मूलतत्त्वानि, कथकनृत्यस्य विदुषी पुरुदाधीचि प्रभृतयः प्रमुखाः आसन्। अस्यां कार्यशालायां नहि मात्र संस्कृतनाटकानां निर्देशनप्रकारस्य गात्रविक्षेपस्य वा प्रशिक्षिणं जातम्, अपितु संस्कृतनाटकेषु लिखितानां संस्कृतवाक्यानां कथमुच्चारणं कर्तव्यम्, अथ च संस्कृतभाषावक्तुरभ्यासः बोधने समर्थश्च भणितम्। कुलसचिवैः प्रो. गायत्रीमुरलीकृष्णनमहोदयैः नटनाटकयोः विषये नैकपाणिनिसूत्राणां प्रमाणत्वेनोपन्यस्य संस्कृतनाट कनां प्रयोगः देशेषु विदेशेषु च भवेदिति धिया विश्वविद्यालयः सर्वदा अपेक्षितनिधि : सामग्रीणाञ्चोपलब्धिः कारयिष्यते,इति आश्वासनं दत्तम्।





एवं संस्कृतनाटकानां निर्देशनप्रकारः, इति विषयमाधारीकृत्य एकविंशतिदिवसीयायाः कार्यशालायाः अनुष्ठानं जातम्। अस्यां कार्यशालायाम्, विभिन्नेभ्यः राज्येभ्यः षष्ठ्यधिकसंख्याकाः प्रतिभागिनः प्रशिक्षणग्रहणाय भागं गृहीतवन्तः। प्रतिभागिनां प्रशिक्षणप्रदातुञ्च देशस्थस्य रङ्गमञ्चस्य प्रख्याताः विद्वान्सः कलानिधयश्चागताः। येषु प्रख्याताः साहित्यकाराः रङ्गमञ्चकलाऽकादमी मुम्बई विश्वविद्यालस्य निदेशकाः , प्रो.योगेशमेनन महोदयाः, नाट्यशस्त्रे निहितानि तत्त्वानि यैः स्वतपसा अधिगतानि स्वविद्ययोप लब्धियशस्काः प्राक्तनस्य राष्ट्रियसंस्कृतसंस्थानस्य कुलपतयः प्रो. राधावल्लभत्रिपाठिवर्याः, नृत्यक्षेत्रेषु लब्धप्रतिष्ठाः नृत्याङ्गना ऐश्वर्याहरीशमहोदयाः, नृत्यविधासु प्रतिभागिनः कथं भविष्यन्तीति विषयेऽपि प्रशिक्षणमभवत्।

कार्यशालायाः समापनसत्रं जूनमासस्य त्रयोविंशतिदिनांके केन्द्रीयसंस्कृतविश्वविद्यालयस्य कर्मनिष्ठकुलपतीनाम्, प्रो. श्रीनिवासवरखेडीमहोदयानां संरक्षकत्वे, उज्जैनीस्थस्य महर्षिपाणिनिसंस्कृतविश्वविद्यालयस्य कुलपतीनाम्. प्रो. सी जी. विजयमेनन महोदयानां मुख्याथितित्वे, केन्द्रीयसंस्कृतविश्वविद्यालयस्य कर्तव्यनिष्ठकुलसचिवानाम्, प्रो. गायत्रीमुरलीकृष्णनमहोदयानां विशिष्टाऽथितित्वे सम्पन्नतामगात्। सम्पूर्तिवेलाऽवसरे प्रो. सी जी. विजयमेनन महोदयेन वर्तमानकाले संस्कृतरङ्भूमिमादाय कार्यशालायाः आयोजनं निश्चप्रचमेव एकः प्रथगेवोपक्रमः इति सारस्वताथितिरूपेणोपस्थिताः प्रो. सुरेशकुमारजैनमहाभागाः स्वीयोद्बोधने गदितं यत् भारतीयसाहित्ये परिष्काराय संस्कृतनाटाकानां सदा सर्वदा आवश्यकता वरीवर्ति अवलोक्यते च। कार्यशालासमापन-सत्रस्याऽध्यक्षाः परिसरनिदेशकाः प्रो. रमाकान्तपाण्डेयवर्याः केन्द्रीयसंस्कृतविश्वविद्यालयस्य भोपालपरिसरस्य नाट्याऽनुसंधानकेन्द्रेण प्रशिक्षणस्य कार्यक्रमाः सततरूपेण प्रचालनं करिष्यति, सहैव संस्कृतरङ्गभूमौ नव-नव प्रयोगाः करिष्यतीति निगदितवन्तः। कार्यशालासमापनसत्रे केरलप्रदेशस्य प्रसिद्धनाट्यनिर्देशकसुरेशमहोदयानां मार्गदर्शने उरुभङ्गवेणीसंहारयोः समायोजनं कृत्वा नाटकस्य प्रस्तुतिरपि जाता।

# भारतवर्षीया प्राचीना विद्या

-डॉ. लक्ष्मीकान्तविमलः, नव देहली

श्रीशंकरशिक्षायतनेन वैदिकशोधसंस्थानेन जूनमासस्य २९ तमे दिनांके सायंकाले ५ वादनतः ७ वादनं पर्यन्तम् अन्तर्जालीयमाध्यमेन एका राष्ट्रिया संगोष्ठी समायोजिता। पण्डितमधुसूदनओझामहोदयस्य इन्द्रविजयस्य धर्मप्रसङ्गं विद्याप्रसङ्गं चाधारीकृत्य इयं संगोष्ठी प्रवर्तिता।



संगोष्ठ्यां काशीहिन्दूविश्वविद्यालयस्य संस्कृत-विद्या-धर्म-विज्ञान-संकायस्य साहित्यविभागस्य आचार्याःप्रो.शिवरामशर्ममहोदयाः विद्याप्रसङ्गस्य विविधान् विषयान् समाहृत्य स्वव्याख्यानम् अकुर्वन्। तैः प्रतिपादितम् यत् इन्द्रविजयग्रन्थे अनेकाः विद्याः समुल्लिखिताः सन्ति। तत्र प्राकृतविद्या, लौकिकविद्या, पार्थिवविषययुक्ता विद्या, दिव्या विद्या, वैदिकविद्या, सूर्यरसविद्या वर्णिताः। तत्र प्राकृतविद्या एवनिगमभेदेन आगमभेदेन द्विधा अस्ति। यथोक्तम्-

'तत्र प्राकृतविद्या निगमागमभेदतो द्विविधा।', इन्द्रविजयः, पृ. १९९

निगमविद्यायाः अष्टादशः प्रभेदाः सन्ति एवं च आगमविद्यायाः संख्या विंशत्यधिकैकशतम् अस्ति-

'नैगमविद्यास्तत्र च मुख्यतयाऽष्टादशः प्रथिताः।
आगमविद्या विंशशतमित्थं सर्वविद्यानाम् ।।', तत्रैव

दिव्यविद्यायाः चतुःषष्ठिः संख्याः सन्ति। चतुःषष्ठिसंख्यात्मकं दिव्यविद्या अस्ति। द्विव्यविद्यायाः चतुर्धा विभागः अस्ति। प्रत्येकं विभागे षोडशः संख्याः भवन्ति। मानसबलानि-बुद्धीन्द्रियवलानि इति प्रथमो विभागः। द्वितीये विभागे अष्टौ दिव्यदृष्टिसिद्धयः अष्टौ देवबलसिद्धयश्च वर्णितास्सन्ति। तृतीये विभागे अष्टौ कर्मेन्द्रियबलानि अष्टौ भूतबलानि, चतुर्थे विभागे अष्टौ आगमीयमन्त्रबलसिद्धयः अष्टौ यन्त्रबलसिद्धयश्च वर्णिताः।

सोमनाथसंस्कृतविश्वविद्यालयस्य साहित्यविभागस्य आचार्याः प्रो. ललितकुमारपटेलमहोदयाः स्वकीये व्याख्याने विद्याप्रसङ्गे वर्णिताः अष्टौ नैगमीयमन्त्रबलसिद्धयः, अष्टौ आगमीयमन्त्र-बलसिद्धयः, अष्टौ महौषधि बलसिद्धयः प्रतिपादिताः। तैरुक्तं यत् प्रसङ्गेऽस्मिन् सर्पाकर्णिणीविद्यायाः वर्णनं कृतं वर्तते या महाभारतकाले आसीत। अनया विद्यया मन्त्रबलेन दूरस्थितस्य सर्पस्य इच्छितस्थाने आकर्षणं क्रियते स्म। जनमेजयस्य सर्पयज्ञे एतादृश्या मन्त्रविद्यया आकर्षणं जातम। अस्मिन् प्रकरणे बह्वव्यः विद्याः निरूपिताः सन्ति।

दिल्लीविश्वविद्यालस्य हंसराजमहाविद्यालयस्य संस्कृतविभागस्य सहाचार्याःडॉ.सतीशकुमारमिश्रमहोदयाः विद्याप्रसङ्गस्य अन्तिमभागे ये ये विषयाः सुगुम्फिताः सन्ति तान् सर्वान् विषयान् समवलम्ब्य व्याख्यानं कृतवन्तः। तैः भणितं यत् सर्वासु विद्यासु स्वयंवहविद्या यन्त्रविद्या अस्ति। स्वयंवह इत्यस्य अर्थः अस्ति स्वचालितं तन्त्रविशेषम। अस्यां विद्यायां दिनस्य षष्ठिघटिकायाः पलविपलादिज्ञानं कारणम् अस्ति।

जवाहरलालनेहरूविश्वविद्यालयस्य संस्कृतप्राच्यविद्याध्ययनसंस्थानस्य आचार्याः प्रो.सन्तोषकुमारशुक्लमहाभागाः कार्यक्रमस्य आध्यक्ष्यम् अपरिपालयन। तैः स्वकीये आध्यक्षीये उद्बोधने प्रतिपादितंयत् प्राचीनकाले भारतस्य ज्ञानं समुन्नतम् आसीत्। संपूर्णस्य विश्वस्य ज्ञानप्रदायकत्वाद् भारतदेशः शिक्षकः आसीत्। यथोक्तम्-

अपि पूर्वस्मिन् काले परमोन्नतिशिखरमायाताः।
एते तु भारतीयाः विशेषां शिक्षका अभवन।। तत्रैव पृ.१७७

न केवलं ज्ञाने अपितु बले पराक्रमे अपि भातवर्षस्य महत्त्वं दृश्यते। अत्र बहवः चक्रवतिनः राज्ञः आसन। ये सप्तद्वीपवतीं पृथ्वीं शशासुः। तेषु राज्ञेषु मान्धाता प्रमुखः आसीत। विष्णुपुराणे तस्य सन्दर्भः प्राप्यते-

'यावत्सूर्य उदेति स्म यावच्च प्रतिष्ठति।
सर्व तद्यौवनाश्वस्य मान्धातुः क्षेत्रमुच्यतेघ', तत्रैव, पृ. १७७

अमेरीका अफरीका यूरोप एशिया, एतान् सर्वान् देशान् मान्धाता शास्ति स्म-

'अमरीकाख्यो देशो देशो योऽफरीकाख्यः।
यूरोप एशिया तान् सर्वान् शास्ति स्म मान्धाता।।', तत्रैव

श्रीलालबहादुर-शास्त्रि-राष्ट्रिय-संस्कृत-विश्वविद्यालयस्य वेदविभागस्य अतिथिप्राध्यापकेन डॉ. ओङ्कारसेल्यूकरमहोदयेन कृतेनवैदिकमङ्गलाचरणेन संगोष्ठ्याः प्रारम्भःसञ्जातः। कार्यक्रमस्य सञ्चालनं श्रीशंकरशिक्षायतनस्य वैदिकशोधसंस्थानस्य शोधाधिकारी डॉ. लक्ष्मीकान्तविमलः कृतवान्। अस्मिन् कार्यक्रमे विविधेभ्यः प्रान्तेभ्यः विश्वविद्यालस्य महाविद्यालस्य आचार्याः शोधच्छात्राः विषायानुरागिणश्च सोत्साहं भागं गृहीत्वा संगोष्ठीं सफलीचक्रुः।

प्रथमपुटस्य शेषभागः **नालन्दा अन्ताराष्ट्रियविश्वविद्यालयः...**

विश्वविद्यालयस्य लक्षशः पुस्तकानि ज्वालितानि। प्रधानमंत्री कथितवान् 'अप्प दीपो भव' सिद्धांतं समाधृत्य अयं विश्वविद्यालयः प्राचीन पद्धत्या आधारितः। अयं विश्वविद्यालयः प्राचीन कालः इव पूर्णविश्वस्मै मानवतामार्ग दर्शयिष्यति। अवसरेस्मिन् बिहार राज्यस्य मुख्यमंत्री श्री नीतीश कुमारोऽपि अकथयद्यत् प्राचीन नालंदा विश्वविद्यालयस्य शैक्षिक परिवेशः ग्राम-ग्रामपर्यन्तं प्रसरितः। योग हि भारतीय विराट संस्कृतेः परिचायकः। विदेश मंत्री एस. जयशंकरः नालंदा विश्वविद्यालयः शिक्षणस्य वैश्विक सेतुं स्थापितवान् इत्यवदत्। प्राचीन काले विश्वविद्यालयः विभिन्न देशेषु परस्परं संबंधं स्थापयितुं माध्यमः अवर्ततस अधुना अयं विश्वविद्यालयः पुनः प्राचीनं लक्ष्यं परिपूरयिष्यति।

# सम्पादकीयम्

सम्मान्याः सुरभारतीसमुपासकाः!

सादरं नमोनमः।

गते 21 जून 2024 तमे दिनाङ्के अंता राष्ट्रिय योग दिवसः पूर्णविश्वस्मिन् महता उत्साहेन समाचर्यते। अस्मिन् दिने कोटिशः संख्यकाः जनाः विश्वस्मिन् योगम् अकुर्वन्। योगस्तु व्यायामस्य एका एतादृशप्रभावशालिनी विधा। यन्माध्यमेन न केवलं शरीरस्य अङ्गानि अपितु मनसि मस्तिष्के आत्मनि च संतुलनं निर्मातुं शक्यते। एतदेव कारणं यत् योगेन शारीरिक व्याधीन् अतिरिच्य मानसिक समस्याभ्योऽपि मुक्तिः प्राप्तुं शक्यते। योगशब्दस्य उत्पत्तिः संस्कृतस्य युज् धातोः भवति । यस्यार्थः आत्मनः सार्वभौमिक चेतनया सह मेलनम्। योगस्तु प्रायः 10000 वर्षेभ्योऽपि अधिका पुरातनविधा। वैदिक संहितानुसारं प्राचीन कालीनेषु श्री वेदेषु अस्य उल्लेखः। सिंधु घाटी सभ्यतायामपि योगं समाधिं च प्रदर्शयन्त्यो मूर्तयः प्राप्ताः। हिंदू धर्मे साधू सन्यासिभिः योगिभिश्च योग सभ्यता आरम्भतः एव अङ्गीकृता। परंतु भारते वैदेशिकानाम् आक्रांतणाम् आङ्ग्लशासनस्य च समये योग विद्या उपेक्षिता अभूत्। परंतु वर्तमाने प्रधानमंत्री नरेंद्र मोदी विश्व स्तरे दिवस रूपेण योगं स्थापितवान्। 11 दिसंबर 2014 तमे दिनाङ्के संयुक्त राष्ट्र महासभा प्रत्येकस्मिन् वर्षे 21 जून विश्व योग दिवस रूपेण मान्यता प्रदत्तवती। योगस्य महिमानं महत्वं च ज्ञात्वा एतं स्वस्थ जीवन शैली हेतवे महता प्रमाणेन समङ्गीकुर्वन्ति स तन्मुख्य कारणम् अद्यतनी व्यस्ता व्यग्रतापूर्णा अस्वस्था च दिनचर्या । यस्यां सकारात्मक प्रभावः भवति। महर्षि पतंजलिः औपचारिक योग दर्शनस्य संस्थापकः मान्यते। तदनुसारं योगस्य अष्ट सूत्राणि उदीरितानि। यमः, नियमः, आसनं, प्राणायामः, प्रत्याहारः, धारणा, ध्यानं समाधिश्चस इत्थं भगवद्गीतायां योगस्य त्रयः प्रमुख प्रकाराः ये च कर्म योगः भक्ति योगः ज्ञान योगः इत्येभिर्नामभिः ज्ञायन्ते।

योग दर्शनकारः पतंजलिः आत्मजगतोः संबंधे सांख्य दर्शनसिद्धांतानामेव प्रतिपादनं समर्थनं च कृतवान् । तेनापि ते एव पञ्चविंशतितत्त्वानि मतानि। तत्र विशेषेण अनेन कपिलस्य अपेक्षा एकम् इतोऽपि षड्विंशतितमं तत्त्वं 'पुरुषविशेषः' ईश्वरः वा अपि मतम्। पतंजलेः योगदर्शनं समाधि, साधन, विभूति कैवल्य इत्येषु चतुःपादेषु भागेषु वा विभक्तम्। योगदर्शने संसारः दुःखमयः हेयश्च मानितः। पुरुष जीवात्मनो मोक्षायः योगमेव एकमात्रम् उपायं मनुते।

भवदीया

सम्पादिका

॥ वेद वाणी ॥

'यदाशसा निःशसाभिशसोपारिम जाग्रतो यत्स्वपन्तः ।
अग्निर्विश्वान्यप दुष्कृतान्यजुष्टान्यारे अस्मद्दधातु ॥
यदिन्द्र ब्रह्मणस्पतेऽभिद्रोहं चरामसि ।
प्रचेता न आङ्गिरसो द्विषतां पात्वंहसः॥

There are many evil deeds about which we remain suspicious and, therefore, remain alert in their avoidance in our wakeful state. And there is possibility of our experiencing these evil deeds in our sleep. Even so, we remain free from doubt and expect what is good while asleep. We earnestly pray to Agni Deva, God of Fire, to keep all such evil and inauspicious deeds far away from us.

O! Lord Indra! O Lord Brihaspati! Even if we have run into any sin against you, show mercy on us and save us. Lord Angirasa and Great and wise Lord Varuna, may protect us from the evils of our enemies.'

The Rig Veda 10.164.3&4

स घा नो योग आ भुवत्स राये स पुरंध्याम् ।
गमद्वाजेभिरा स नः ।

' Lord Indra will certainly grant us wealth we have had no opportunity of having till now. He will confer on us great wealth. May he bestow on us various kinds of intelligence and wisdom. May He come to us vast amounts of food.'

The Rig Veda 1.5.3

सं पूषन्नध्वनस्तिर व्यंहो विमुचो नपात् ।
सक्ष्वा देव प्र णस्पुरः॥
यो नः पूषन्नघो वृको दुःशेव आदिदेशति ।
अप स्म तं पथो जहि॥
अप त्यं परिपन्थिनं मुषीवाणं हुरश्चितम् ।
दूरमधि स्रुतेरज॥
त्वं तस्य द्वयाविनोऽघशंसस्य कस्य चित् ।
पदाभि तिष्ठ तपुषिम् ॥
आ तत्ते दस्र मन्तुमः पूषन्नवो वृणीमहे ।
येन पितघ्नचोदयः॥'

'O! Liberating Pusan (Sun)! Help us traverse the road without obstruction. Aid us to overcome sin. Keep us forward and go ahead of us.

O! Pusan! Drive away cruel and wolf-like enemy who lies in wait for distracting us from right path and injuring us.

Chase away from our path the deceitful robber and cheat and destroy him.

Trample upon the sinful and wicked with your feet and stand forth as our guard.

O! Wise Pusan! You always crush our enemies. We always seek your protective care that guarded and inspired our forefathers earlier.'

The Rig Veda 1.42.1-5

**संकलन : एस.वासुदेव रावः**

# महामहोपाध्याय-कपिलदेवपाण्डेयमहोदयानां कृतिषु गवेषणाधारा

**-प्रो० (डॉ०) विवेकपाण्डेयः**
विभागाध्यक्षः, संस्कृतविभागः,
हँडिया पी जी कॉलेज, हँडिया,
प्रयागराज उत्तर-प्रदेश

जयतु कपिलदेवो नाम पाण्डेय एष,
स्वरससहवेशप्रीतिपीयूषजूषः ।
जयतु च रमणीयः प्रोल्लसद्वाग्विलासः
दिवि दिविषदिवायं देवभूतिर्विभूतिः ॥
देहं को न विसृज्य याति सदनं मृत्योः परं ये यशः,
शुभ्राः सगुण-भूषिताश्च कृतिनस्तेऽत्रैव तिष्ठन्तकि।
दृष्टान्तोऽत्र सदाशयः स 'कपिलो' यस्त्यक्तदेहोऽपि
नश्चित्पीठे सततं चकास्ति विदधन्त्राट्यं स्मिताढ्यं कृती॥
कदाचिज्जायते कश्चित् साधुप्रकृतिको जनः ।
यस्य सगुणसौरभ्यमभ्याहरति मानसम् ॥

प्रतिभाप्रसवित्र्यां भारतधरित्र्यां गृहीतजन्मनां प्राचीनसंस्कृताध्ययनप्रौढ़परम्परापरिपुष्टानां प्रकाण्डपाण्डित्यजुषां युगपद् विविधविद्याङ्गपुङ्गवत्वं नैकेषु शास्त्रेषु समानरूपेण समर्जितवैदुषीकत्वं च सर्वतः सर्वथा च प्रथितमेव । अनेकशताब्दं यावत् पारतत्र्यदोषात् क्षीणविद्यादिवैभवेऽपि पाश्चात्यज्ञानाभासप्रभावभावितेऽपि भारते प्रकाशात्मनो ज्ञानस्य परम्परा अद्यापि अविच्छिन्नतया बीजरूपेण वर्तमाना स्वयं जीवति भारतस्यास्मितां सम्यग्ग्रीवयति च ।

**कविपरिचयः**

तपः पूतमनोवाक्कायानां विविधशास्त्राध्ययनाध्यापनलेखनेन स्वजीवनं सार्थकं विदधानानां ग्रन्थग्रन्थिभेदनदक्षाणां सदाचारपावितचरितानां पण्डितप्रकाण्डानाम् आचार्यवर्याणां श्रीमतां आचार्यकपिलदेवपाण्डेयानां चरितश्रवणेन च कस्य हदि शास्त्रीय व्यासङ्गविषये रुचिः प्रेरणा वा न जागर्ति? आचार-विचार-साधनाप्रभृतयो गुणाः यदि एकत्र क्वचिद् लभ्येरन् तर्हि एषामेव तपः स्वाध्यायनिरते जीवने। आचारपूतत्वं साधनारतत्वं शास्त्रव्यासङ्गश्च एतेषां विशिष्टं वैशिष्टयमासीत्। एषां कर्मभूमिः भारतस्य सांस्कृतिकनगरी काशी एव। अत्रैव एभिः उच्चाध्ययनम् अध्यापनं विशिष्टशोधपरकग्रन्थानां प्रणयनं च विधाय तद्वारा लोकोत्तरं यशः समवाप्य च 'अधीतमध्यापितमर्जितं यशः' इत्याभाणकं सार्थकीकृतम् ।

एषां जन्मभूमिस्तु विविधविद्याविशारदप्रसवशालि भारतीयस्वातत्र्यसंग्रामविषये प्रथितकीर्तिबलियामण्डलम् । एभिः १९९३ वैक्रमे वत्सरे भाद्रपदपूर्णिमातिथौ तदनुसारं १९३६ खीस्ताब्दे सितम्बरमासस्य प्रथमे दिनांके उत्तरप्रदेशस्य बलियाजनपदान्तर्गत-रतसरग्रामाभिजनः पराशरगोत्रीयः सरयूपारीणब्राह्मणवंशः स्वजनुषा अलमकारि। एषां पितुर्नाम श्रीविश्वनाथपाण्डेयः मातुश्च नाम लक्ष्मीदेवी इति। पिता एकः सदाचारपरायणो भागवतीयो विद्वांश्चासीत् । माता औपचारिकशिक्षा विरहिता सती अपि बुद्धिमती, गृहकार्यदक्षा धर्माचरणपरायणा चासीत्। श्रीमद्भागवतमहापुराणप्रवचनपटुपितुः धर्मानुष्ठाननिपुणायाः मातुश्च संस्कारप्रभावादेव शैशवादेव एषु महनीयगुणानामाधानं जातम्।

आचार्यकपिलदेवपाण्डेयानां प्रारम्भिकी शिक्षा स्वग्रामस्थायां प्राथमिकपाठशालायां समपद्यत। ततः परं ते १९५३ तमे खीस्ताब्दे वाराणस्यां लालघट्टे-बिड़लासंस्कृतपाठशालायां पूर्वमध्यमाकक्षायां म०म० पण्डितसभापतिशर्मोपाध्यायानामन्तेवासित्वे प्रवेशं लेभिरे। सहैव क्वीन्सइण्टरराजकीयविद्यालये एकादशकक्षायां प्रविष्टवन्तः । छात्रवृत्तिप्रतियोगितापरीक्षामुत्तीर्य प्रतिमासम् अष्ट- रूप्यकाणि छात्रवृत्तिरूपेण वर्षद्वयं यावत् प्राप्य इंटरपरीक्षा १९५५ वर्षे समुत्तीर्णा । बी०ए० कक्षायां संस्कृतम्, आंग्लभाषा, दर्शनशास्त्रं चौषां विषयाः आसन् । काशीहिन्दूविश्वविद्यालयतः १९६२ तमे वर्षे एम० ए० परीक्षायां प्रथमश्रेणी प्राप्ता, समुत्तीर्णछात्रेषु प्रथमं स्थानञ्च लब्धम्। विश्वविद्यालयीयशिक्षया सह तैः म०म० पण्डितसभापतिशर्मोपाध्यायमहोदयेभ्यो विधिवत् व्याकरणशास्त्रविषयकमध्ययनं कृतम्। संस्कृतशिक्षासरणौ गभीरज्ञानार्जनार्थम् एका प्राच्यपद्धतिरपि वर्तते। तामधिकृत्य पाण्डेयवर्यैः तया पद्धत्यापि स्वपितृव्यचरणानाम् अन्तेवासित्वेपि व्याकरणशास्त्रमधीत्य १९६५ तमे खोष्टाब्दे सम्पूर्णानन्द सं०वि० विद्यालयः) नव्यव्याकरणाचार्यपरीक्षा प्रथमश्रेण्यां समुत्तीर्णा। एवं प्रकारेण आचार्यकपिलदेवपाण्डेयः प्राच्यप्रतीच्योभयविधिना संस्कृतवाङ्गये निष्णाता अभूवन् ।

१९६३ तमे वर्षे जूनमासस्य पञ्चदश दिनांके एषां विवाहविधिः सोनमतिदेव्या सह सम्पन्नः, समपद्यत। तदा पाण्डेयमहोदयाः केन्द्रीयसर्वकारसेवायां डाकतारविभागे अधिकारिपदे आसन्। पुनः १९६६ तमे वत्सरे एव काशीहिन्दूविश्वविद्यालयतः प्रो० सिद्धेश्वर भट्टाचार्यमहोदयानामन्तेवासित्वे पी-एच्०डी उपाधिमवाप्य १९६७ तमे वर्षे काशीहिन्दूविश्वविद्यालयेन सहसंबद्धे आर्यमहिलामहाविद्यालये संस्कृतप्राध्यापकपदे ससम्मानं नियोजिताः। पाण्डेयवर्याः तत्र स्वकीयया विशिष्टया अध्यापनशैल्या मधुरव्यवहारपूर्वकम् अध्यापनं विधानैरेभिः अनितरसाधारणं यशः समर्जितम्। 'अधीतमध्यापितमर्जितं यशः' इत्युक्तिः अन्वर्थतां नीता च। अध्यापकपुङ्गवस्य ये ये गुणाः अमितगतिश्रावकाचार्यैः वर्णिताः ते सर्वे एषु शिक्षकाणां धुरि प्रतिष्ठापयितव्येषुश एकत्र यथायथं विराजन्ते इति तदध्यापनानुभवितारः तच्छिष्याः मुक्तकण्ठं प्रशंसन्ति-

श्येषां तपः श्रीरनघा शरीरे विवेचिका चेतसि तत्त्वबुद्धिः ।
सरस्वती तिष्ठति वक्रपद्मे पुनन्तु तेऽध्यापकपुङ्गवा नः ॥

तपोजन्या कान्तिः; अध्यापकस्य शारीरिको गुणः, तत्त्वविवेचनपरा बुद्धिर्भवेदिति तस्य मानसो गुणः, व्याख्यानकाले तथा प्रतीयेत यथा साक्षात् वाग्देवी मुखकमले समासीना विलसति इति तस्य वाचिको गुणः। एतैस्त्रिभिः मनोवाक्कायिकैः गुणैः समन्वितोऽध्यापकः वस्तुतोऽध्यापकपदभाग्भवति अन्यथा 'तं ज्ञानपण्यं वणिजं वदन्ति'। साम्प्रतं विद्यापचितिकाले ज्ञानपण्या वणिज एव प्रायशोऽध्यापकंमन्याः समवलोक्यन्ते। हन्त! ते दिवसा गताः यदा विश्वविद्यालयेषु महाविद्यालयेषु च प्रो० विश्वनाथ भट्टाचार्य-प्रो० जयशंकरलालत्रिपाठि-आचार्यकपिलदेवपाण्डेय-प्रो० कृष्णकांतशर्मासदृशाः शास्त्रचिन्तनैकव्यसनाः सर्वदा प्रतिक्षणम् अध्ययनाध्यापनरताः अध्यापकाः प्रातिभप्रकाशकिरणानि विकिरन्तो छात्रान् पुत्रीयन्तश्च व्यराजन्त। पाण्डेयवर्याणां शिष्यसम्पतिः ग्रंथसंपत्तिश्च उभयी अतीय समृद्धास्ति। आसेतु हिमालयं देशे विदेशेष्वपि प्रशासनिकपदेषु शिक्षाक्षेत्रेषु च एतेषां शिष्यश्शृङ्खला विराजते।

कश्चित्सम्भाषणेशक्तः कश्चिदध्यापने तथा ।
कृतौ कश्चिन्मतौ कश्चित्सार्वभौमस्तु कुत्रचित् ।

आचार्यपाण्डेयस्य चतुर्मुखीना कुशाग्रधिषणा सर्वविद्याक्षेत्रच्छत्रेवाध्ययनाध्यापनप्रवचनलेखनाध्यापनाभिनयनाट्यनिर्देशना-दिकौशलमवगाहमाना विद्वत्त्वकवित्वोभयविधप्रागल्भ्यं सुतरां संबिभ्रती काशिकेयविद्वत्समाजेलब्धप्रतिष्ठास्पदोधुरीणाऽऽसीत् । १९९७ तमे खैस्ते वत्सरे पाण्डेयमहाभागाः आर्यमहिलामहाविद्यालयतः प्राप्तावकाशाः सन्तः गृहमेवाध्युष्य अध्ययनाध् यापनलेखनादिना कार्यजातेन व्यतीयुः । एतेषां तपः स्थलं वाराणस्यां आसीत् । वाराणस्यामेव २००५ तमे वर्षे सितम्बर मासस्य सप्तविन्शतिदिनाङ्के महाप्रायणं स्वीकृतवन्तः ।

**ग्रन्थानां परिचयः**

एभिर्लिखितानां मौलिकग्रन्थानां शोधनिबंधानां संख्या शताधिकास्ति। तैः प्रायः सर्वे ग्रंथाः हिन्दी-संस्कृत-आंग्लभाषामाध्यमेन प्रणीताः। अधिकारस्तु एषाम् अंग्रेजी फ्रेंच-संस्कृत-कन्नड-उर्दू-बंगलादिभाषासु समानरूपेणासीत। एतेषां प्रकाशिताः कृतयःसन्ति क्रमशः रुद्रटकृतस्य श्रृंगारतिलकस्य सानुवादं संपादनं (१९६८ ई० वर्षे), छन्दोऽलंकारविमर्शः (१९८४ ई० वर्षे), संस्कृत ज्ञान के बिना कोई भी शिक्षा अधूरी (१९९९ ई० वर्षे), पाथेय हिन्दीकवितासंग्रहः (२००१ ई० वर्षे), मीमांसान्यायप्रकाशविमर्शः (२००१ ई० वर्षे), डॉ के०एच्० पॉटरमहोदयस्य संपादकत्वे न्यूयार्कात् प्रकाशिते इंसाइक्लोपीडिया ऑफ इण्डियन फिलासफी इत्यस्य सांख्ययोगखण्डे प्रविष्टिद्वयं (२००१ ई० वर्षे), विचारविमर्श हिन्दीनिबन्धसंग्रहः (२००४ ई० वर्षे), अद्यपि ग्रंथस्य संपादनं (२००४ ई० वर्षे), Revisiting the past (Philosophy, Philology & Puranas) (२००५ ई०

शेषभागःपंचमपुटे

वर्षे), केचन संस्कृतशिक्षणपाठाः (२००५ ई० वर्षे), शास्त्रविमर्शः (२००७ ई० वर्षे) संस्कृतभाषामाध्यमेन विरचिताः ग्रन्थाः 'शास्त्रविमर्शः, मीमांसान्यायप्रकाशविमर्शः, केचन संस्कृतशिक्षणपाठाः स्वकीयं विशिष्टं महत्त्वं बिभर्ति। नैकेषां ग्रन्थानां भूमिकाः एवं च त्मअपेपजपदह जीम चेंज (Philosophy, Philology & Puranas) ग्रन्थः अंग्रेजी भाषामाध्ययेन लिखिता यत्र आंग्लभाषाविषयिणी अभिव्यक्तिचमत्कृतिः उल्लेखनीयास्ति । एषां लेखनपक्षं दृष्ट्वा एकः श्लोकः स्मृतिपथमागच्छति, यत्र लेखकगुणाः वर्णिताः सन्ति, ये पाण्डेयवर्येषु कार्येनोपलभ्यन्ते-

मेधावी वाक्पटुः प्राज्ञः सत्यवादी जितेन्द्रियः ।

सर्वशास्त्रसमालोकी ह्येष साधुः स लेखकः ।।'

इत्थं शिष्यसम्पत्त्या, ग्रन्थसम्पत्त्या, मधुरया व्याख्यानकलया सहजसरलविनीतव्यवहारेण च संपृक्तेभ्यः लब्धानेकपुरस्कारसम्मानेभ्यः आचार्य कपिलदेवपाण्डेयमहोदयेभ्यः विविधाभिः विशिष्टसंस्थाभिः 'संस्कृतगौरवसम्मान'-संस्कृतपण्डितसम्मान- श्कालिदाससम्मान महामहोपाध्याय-प्रभृतयो मानदोपाधयः सादरं सबहुमानं च समर्पिताः। आचार्यवर्यः चिरकालानुवर्तिनी संस्कृतवाङ्गयसपर्या नानाक्षेत्रेषु शास्त्रश्रमगीर्वाणवाण्या समुन्नयनं अद्भुतं अविस्मरणीयं अनुकरणीयं चासीत् । पाण्डेयवर्यैः विरचितानां ग्रन्थानां विषयाः संस्कृतवाङ्गयस्य प्रायशः सर्वाणि क्षेत्राणि विधाश्च व्याप्य वर्तन्ते। कवि-काव्य- साहित्येतिहास-काव्य-शास्त्र-दर्शन-धर्म-संस्कृतिवेद- पुराणादिविषयानधिकृत्य एभिः प्रामाणिकाः शोधपूर्णाश्च ग्रन्थाः निबंधाः च लिखिताः । एषां हिन्दीभाषया निबद्धान् मौलिकान्, सम्पादितान् विशिष्टग्रंथान्, विविधेषु अभिनन्दनग्रन्थेषु प्रकाशितान्, शोधपूर्णान् तल्लेखान्, शोधपत्रिकासु प्रकाशितान् निबन्धान् प्रकाशितान् सारमयान् लेखांश्च समवलोक्य एवमेव प्रतीयते एतेन शास्त्रवैलक्षण्येन साकं तेषु लोकभाषां भोजपुरी लोकसंस्कृतिं प्रति यथा अनुरागो वर्तते सोऽपि, स्पृहणीय एव।

**गवेषणाविषयाः**

'काव्यप्रपानिका' इति नाम्ना काव्यरसपानलोलुपेभ्यो विदग्धेभ्यः काव्यरसानां पानमेव मन्ये पाण्डेयमहोदयानामभिप्रेतमस्ति। तथापि अत्र रचनानां विभाजनं रसान्नानुसरति, यतः प्रकृत्या रसपानलोलुपाः विदग्धा उन्मत्ता मधुपा इव यतः कुतश्चिद् वा रसमन्विष्य तदास्वादनेनात्मानं तर्पयन्त्येव, तथैवात्र रसग्रहणं पाठकानां प्रकृतेः क्षमतामपेक्षते, न तु साक्षाद् रसानां ग्रहणम्।

अतः पाण्डेयमहोदयैरत्र नानाविधान् देशकालोचितान् विषयान्, विविधान् हार्दिकान् मनोभावान् विचारांश्च आधारीकृत्यैव रचनानां शीर्षकाणि कृतानि । श्लोकान् विहाय गीतानां कवितानाञ्च शीर्षकाणि पञ्चाशतोऽप्यधिकानि वर्तन्ते। परन्तु मया मच्चिन्तनानुसारेण इमाः रचना अन्यादृशेष्वेव शीर्षकेषु विभाजिताः कृत्वा तद्विषये स्वकीया विचाराः प्रकटयितुं चिकीर्षिताः ।

तानि शीर्षकाणि इमानि सन्ति-उपालम्भः (कथं कामयसे), परिदेवना (जीवान्यहं कथम्), आकाङ्गा (कीदृशं भारतं भारतीमन्तरा), सूक्तिः (श्रम एव सिद्धिमन्त्रः), भारतम् (भारती वसुन्धरा), विडम्बना (जीवनम्), सामाजिकाः प्रश्नाः (केचन प्रश्नाः), भारतीया संस्कृतिः, लोकशिक्षा, प्रदूषणम्, यौवनमहत्त्वम्, हार्दिकी स्पृहा चेत्यादयः । इमान् विषयानधिकृत्य पाण्डेयमहोदयैः ये मार्मिका उद्‌गाराः प्रकटीकृताः सन्ति, ते नूनं सहृदयानां हृदये कामपि नूतनां प्रेरणां, नूतनमावेगं, नूतनांश्च विचारान् जनयित्वा भारतीयसमाजस्य परिवर्तने नवनिर्माणे च मार्गदर्शका भवितुमर्हन्ति। एकैकोदाहरणप्रदानेन विषयमिमं स्पष्टीकर्तुं कामये-प्रथमं तावत् 'भारती वसुन्धराश, श्संस्कृता संस्कृतिः', 'कीदृशं भारतं भारतीमन्तरा' इत्यादिषु गीतेषु भारतभूमिविषये, संस्कृतिविषये, भारतभारत्योः व्यति- करविषये, भारतानुपूरकत्वविषये च या चिन्ता प्रकटीकृता वर्तते याश्च वेदनाः अनुभूयमानाः सन्ति ताभिः पाण्डेयमहोदयानां राष्ट्रियभावना पूर्णरूपेणाभिव्यक्ता प्रत्यक्षीकृता भवति । वस्तुतः पाण्डेयमहोदया राष्ट्रियकवयो वर्तन्ते येषां कवितासु पदे पदे राष्ट्रियचिन्तनधारायाः प्रतिध्वनिस्तारस्वरेणानुगुञ्जतीव।

पुनश्च वर्तमान भारतीयसमाजे विभिन्नजातिसम्प्रदायजात्युपजाति- प्रभृतीनि यानि राष्ट्रस्यैकताया विघातकानि तत्त्वानि वर्तन्ते यदा कदा च स्वकीयं विकरालं स्वरूपं प्रदर्शयन्ति ध्वंसयन्ति च भारतीयबन्धुतायाः सुदृढानाध ारस्तम्भान्।

पाण्डेयमहोदयास्तादृशेभ्यस्तत्त्वेभ्योऽपि असावधानाः उदासीना निश्चिन्ता वा न विद्यन्ते। स एव भावस्तेषां 'त्यज्यतां भारतीयैर्विभेदो मिथः' इति कवितायां सुस्पष्टरूपेण प्रतिध्वनितोऽस्ति । यस्य देशस्य संस्कृतेः 'वसुधैव कुटुम्बकम्' इत्यादर्शो घोषितः स्यात् तत्र 'भारतमेव कुटुम्बम्' इत्येतावदपि रूपं यदि विचारे व्यवहारे वा दृष्टिपथं नावतरति तर्हि किमतः परं दौर्भाग्यम् । अतः सैषा कविता जने जने यदि प्रचारिता भवेत्तर्हि देशस्य महत् कल्याणं सम्पद्येत।

गजलगीतविधिमनुसृत्य तु प्रचुरमात्रायां संस्कृतेः गजलगीतानि लिखितानि । अस्यां कृतावपि गलज्जलिकानाम्नि प्रकरणे षड् गजलगीतानि तैर्व्यलिख्यन्त, येषु 'वसन्तः' शीर्षकेण गलज्जलिका मम बहु रुचिकरं प्रतिभाति -

अनुचिन्तयामि सततं विमृशामि नित्यमन्तः ।
न कदापि समायातो मम जीवने वसन्तः।।
ईषत्स्मितिं कदाचिद् वदने न मे विलोकय ।
सा तीव्रवेदनाया रेखास्ति काचिदन्तः।।
कस्यापि हितं कर्तुं सामर्थ्यमेव नाप्तम्।
अहितं कथं विदध्यां न तथा प्रवृत्तिरन्तः।।
अधुनातने समाजे साध्येत मद्धितं किम् ।
साध्योऽस्ति तद्धितो मे जातोऽद्य सत्कृदन्तः।।
सहकारमन्तरा मे सौभाग्यलता शुष्का।
धूमायितः स वह्नियों ज्वालितो हृदन्तः।।
वातः कथं कुवातो निःशेषदेशमध्ये।
भीताः समस्तसन्तस्त्वभयं गता असन्तः।।
प्रविलोक्य बाह्यरूपं निश्चेतुमस्त्यशक्यम्।
ननु सन्ति केऽत्र सन्तः के तत्त्वतस्त्वसन्तः।।
केचित् किमप्यकृत्वा सकलं फलं लभन्ते ।
त्वं नासि श्कपिलश् तेषां ये सन्ति भाग्यवन्तः।।

कजरीविवाहादिगीतेषु या लोकगीतोचिता लयमाधुरी दृश्यते सा तु सहृदयपाठकप्रामाण्येनैव सिद्धा। तद्विषये किमुच्यताम् ! तानि गीतान्ति मनोहरिणबन्ध नवागुराभूतानि प्रसह्य हृदयं बनन्ति । चिराऽभ्यस्तत्वात शृण्वतां सद्यः परिनिर्वृतिरपि जायते लोकगीतैः । तद्यथा शनिर्वासिता सीताश शीर्षकेण [लक्ष्मणं प्रति व्याहरति]

पुनः पुनः पृच्छामि, किमपि नोच्यते त्वया ।
को नु दोषोऽस्ति मे येन निर्वासिता।
हर्म्ययोग्याप्यहं कानने वासिता।।
मुधा मौनमाकलयता, न शोच्यते त्वया।
पुनः पुनः वत्स, राजास्त्यसौ स क्षमो दण्डने ।
धर्मचारिणीं परित्यज्य प्रजारञ्जने ।।
न कापि दण्डार्हता समवलोक्यते मया ।।
पुनः पुनः यद्वियोगाद् रुषा राक्षसेशो हतः ।
विक्लवेनाश्रुभिः प्रस्तरो रोदितः ।।
सैव कथं वञ्चिता, नावबुध्यते मया।।
पुनः पुनः पृच्छामि, किमपि नोच्यते त्वया

अर्वाचीनसंस्कृतकविताया इदमेव सरलसरलं मसृणमसृणं मल्लिकाक्षवाहिनीचरणेन्दीवरमधुव्रतकल्पाः गूढगूढं च रूपम् । तत्रापि कवयः स्व- प्रतिभादिसंस्कारसहकृतसामर्थ्यसदर्थिताः स्वाभिरुचितं किञ्चित्कुर्वाणाः प्रथन्ते। अधिवाटिकं भवन्त्येव नानाविधपुष्पाणि वर्णगन्धादिदृष्ट्यापृथग्भूतानि । परन्तु वाटिकादृष्ट्या समेषां महत्त्वम्। देवार्चनदृष्ट्या कस्यचिदन्यतमस्य वाऽपि।

पाण्डेयनामकपिलोऽद्यकाव्यमेत-न्निर्माय यत्सुमनसामुपदीकरोति।

तद्रत्नवत्सुरनदीवदमन्दनिर्यन्निस्यन्दवच्च सुधियां मुदमातनोतु ।।

नूनं परवर्तिकवीनां कृते आदर्शं संस्थाप्य काव्यनिर्माणपरम्परायां कामपि नूतनां शृङ्खलां नियोज्य भृशमुपकृतः सहृदयसमाजः संस्कृतसाहित्यजगच्च ।

श्रीपाण्डेयमहोदयकुशलकविश्रीविनिर्मिता रुचिरा।

काव्यप्रपानिकेयं रसिकजनानां मुदे भूयात् ।।

डॉ० कपिलदेवपाण्डेयविद्वन्मनीषि-प्रणीतशास्त्रीयनिबन्धसंग्रहः शास्त्रविमर्शः समीक्षासौष्ठवविचारप्रवणवैदुष्यनिकषीकृतः सचेतसां सुधियां प्रशस्तिभाजनीभूय तदीयां कीर्तिकौमुदीमुद्द्योतयतीति। काशिकेयविद्वत्समाजे लब्धप्रतिष्ठास्पदोधुरीणाऽऽसीत् । संग्रहेऽस्मिन् शताधिका नैकविषयका निबन्धाः शास्त्रीया वर्ण्यवर्णच्छायामनुहरन्तो रचयितृकारयित्रीं प्रतिभामनुदर्शयन्तश्च प्रविभान्ति । एतस्मिन् संग्रहे प्रायो यावन्तो निबन्धास्ते सर्वेऽपि विशिष्टाशयजुषो विषयवैविध्यविभूषिता साधारणानां छात्राणां विशिष्टानां विदुषां च सामान्यविशेषनिरपेक्षं भीरत्तत्त्वावगहिसमीक्षोत्कर्षनिष्कर्षनिर्भरा निःशेषानधीतिनः संस्कृतज्ञान- समावर्जयितुं क्षमन्ते ।

भाषाशिक्षणं तु काचिदविच्छन्ना प्रक्रिया। यथासमयं संस्कृतभाषाशिक्षणपद्धतौ महत्परिवर्तनमपेक्ष्यते। संस्कृतछात्राणां बोधनार्थं नूतन विधिना केचन संस्कृतशिक्षणपाठाः पितृपादैः डॉ० कपिलदेव पाण्डेय-महाभागैः रचिताः । येन सारल्येन सुष्ठुरूपेण च संस्कृतस्य ज्ञानमधिगन्तुं नवीना छात्राः समर्थाः स्युः । सम्प्रति प्रचलितेषु भाषाशिक्षणविधिषु प्रत्यक्षपद्धतेः (Direct Method) श्रेष्ठत्वं स्वीक्रियते। संस्कृतमाध्यमेन संस्कृतभाषाशिक्षणम् इति ग्रन्थस्यास्य विशिष्ट विशिष्ट्यम्। भाषाशिक्षणे संवादशैली नितरां चारुतरा रसरुचिपूर्णा सम्प्रेषणक्षमा च भवति। अनया शैल्या क्षिप्रमेव सम्भाषणकला विकासोऽपि सम्पत्स्यते । कदाचित् इत्येव मनसि निधाय पूज्यपादैः संवादशैल्या शिक्षणपाठाः सङ्घटिताः। केवलं व्याकरणाधृता शिक्षणपद्धतिश्छात्राणां काठिन्यं शुष्कत्वं च नोत्पादयेदिति धिया मध्ये मध्ये मनोहराणि सुभाषितान्यपि सन्निवेशितानि।

यदि व्यवहारभाषारूपेण प्रत्यक्षविधिना संस्कृताध्ययनाध्यापनं सर्वत्र शिक्षणसंस्थासु स्यात् तर्हि संस्कृतजिज्ञासूनां महानुपकारो भवेत्। संस्कृतस्य लोकाभिमुखीकरणे ग्रन्थोऽयं पद्धतिरियं च नूनमतीव उपयुक्ता भवितुमर्हतीति विश्वसिमि । संस्कृत भाषाशिक्षणात्मकेऽस्मिन् ग्रन्थे सप्तविंशति पाठेषु संस्कृत-सम्भाषण- व्याकरणशिक्षण छन्दोऽलङ्कार-नीतिप्रभृतयो बहवो विषयाः अतीव सरलसरसपद्धत्या विवेचिताः। एतेषामध्ययनेनानुशीलनेन गवेषणया च सामान्यसंस्कृतज्ञानसम्पन्नोऽपि जनः सुतराम् आनन्दमनुभविष्यति।

संस्कृतज्ञानवृद्ध्यर्थं यतन्ते येऽत्र भूतले।

ग्रन्थेनानेन ते तोषं लभन्तां खलु सज्जनाः ।।


अमितगुणगणगरिष्ठानां संस्कृतभाषायाः समुन्नयनैकव्रतानां महामनीषिणां डॉ० कपिलदेवपाण्डेयमहाभागानामुपकारान् संस्कृतजगतः सदस्याश्च कदापि विस्मर्तुं न शक्नुवन्ति। पूज्यवर्याणां तपः पूतं जीवनं तत्कृतीश्च विलोक्य सरभसं मुखान्निः सरति-

जयन्ति ते सुकृतिनः रससिद्धाः कवीश्वराः ।

नास्ति येषां यशः काये जरामरणजं भयम् ।। इति शम्




## नवगीतिकाशती-11



डा०लक्ष्मीनारायणपाण्डेय:
सी- 29 इन्द्रविहार एयरपोर्ट
रोड,लालघाटी,भोपाल मप्र

विश्वविजयिनी भारतमाता
यस्याः क्रोडे क्रीडां कुरुते धूलिधूसरो धाता ।

हैमाद्रिस्वर्णाभकिरीटं
दीप्तिविधानं तनुते,
अम्भोधि:फेनाम्बुधारया
पदक्षालनं कुरुते,
ऋतम्भरेयं रम्या वन्द्या संसारे विख्याता।

गङ्गायमुनागोदानीरै:
सिञ्चति पाति पुनाति
रत्नाकरी शाङ्करी धात्री
स्वर्गाद् सुखदा भाति,
नित्यं ते पदयुग्मे पूते वयं नता हे मात: ।

त्यागतपस्यातपोवनेषु
यस्या:कीर्तिरशेषा,
तपोधनानां यशोधनानां
हृद्या मूर्तिविशेषा
देवा जयगानं कुर्वन्ति सैषा भुवि विज्ञाता ।

धान्यै:शस्यै रसैर्मातृवल्
लोकमियं पुष्णाति,
रक्षति मुदा दधाति बिभर्ति
सौख्यमियं प्रददाति,
रसा वत्सला पुण्या भूमिर्यत्र जनि:सञ्जाता ।

## कामयेऽहम्



-डॉ सत्येन्द्र पाण्डेय
सहायक आचार्य,
संस्कृतविभाग,
जगजीवन कॉलेज,
आरा, भोजपुर, बिहार,
पिन- 802312

सदाव्याहतां ते गतिं कामयेऽहम्।
न कुत्रापि काञ्चिद्यतिं कामयेऽहम्॥

रहस्यं हि शास्त्रस्य गूढातिगूढम्।
समायातु तादृङ्मतिं कामयेऽहम्॥

प्रवक्तुं विना हृद्गतं योऽवगच्छेत्।
प्रजारञ्जकं भूपतिं कामयेऽहम्॥

समग्रासु विद्यासु पारङ्गतो य:।
न दर्पोऽस्ति तस्मै नतिं कामयेऽहम्॥

विवेकी कृतज्ञ: प्रियो मानहीन:।
सुवश्यां तथा सन्ततिं कामयेऽहम्॥

यशो व्यापृतं स्यात्सदा सर्वदिक्षु।
सखे! तादृशीं ते कृतिं कामयेऽहम्॥

न सत्येन्द्र! तुच्छं स्थलं विद्यते ते।
त्वदर्थं सुयोग्यां सृतिं कामयेऽहम्॥

## विभाति भव्यभारतम्



-ईशानतिवारी,
दिल्ली

राष्ट्रमद्भुतं विभाति भव्यभारतम्
बुधाबुधै: सुवन्दितं प्रियम् ।

देव-नाम-गायकै: ,
भक्ति-पूर्ण-भावकै: ।
नाम-कीर्तनेन सर्वथाभिनन्दितं
बुधाबुधै: सुवन्दितं प्रियम् ॥

विभिन्नपुष्प-भूषितञ्च,
कौकिलैर्गुञ्जितम् ।
वृक्ष-पोषकै: सर्वदाभिवन्दितं
बुधाबुधै: सुवन्दितं प्रियम्॥

यज्ञ-भूम-पावनं,
पवित्रदेवतालयम् ।
यज्ञपण्डितैर्मण्डितं सुधालयम्
बुधाबुधै: सुवन्दितं प्रियम्॥

राष्ट्रभक्तसैनिकै:
चिकित्सकै:, लेखकै:
ईशानबालकेन सादरं समर्चितम्
बुधाबुधै: सुवन्दितं प्रियम्॥

राष्ट्रमद्भुतं विभाति भव्यभारतम्
बुधाबुधै: सुवन्दितं प्रियम् ।

## योगे विश्वस्य कल्याणं निहितमस्ति सर्वथा



प्रो. बनमाली बिश्वाल:

सामंजस्याय योगोस्ति योगोपि शान्तये पुन:।
स्वास्थ्यलाभाय योगोस्ति धर्माध्यात्मप्रसंगत:॥
शरीरमनसोर्मध्ये सामंजस्यं योगोस्ति वै।
योगो जीवनविज्ञानं कलोस्ति जीवनस्य वै॥
वैयक्तिकं च चौतन्यं सार्वभौमेन युज्यते।
एतद् योगस्य योगत्वं योगविद्भिश्च मन्यते॥
आत्मनस्तु भवेद् योगो यदा तु परमात्मना।
स च योगोपि लोकेस्मिन् योगनाम्ना प्रसिद्ध्यति॥
योगे विश्वस्य कल्याणं निहितमस्ति सर्वथा।
मानवताहितायात्र नूनं योगस्य भूमिका॥
न चात्मन: कृते योग: समाजस्य कृते पुन:।
इति विषयमाश्रित्य योगोत्सव: प्रवर्तते॥
योगदिनप्रतीकं च योगार्थसूचकं मतम्।
हस्तयोर्मेलनं यत्र योगं द्योतयति क्वचित्॥
योगवृक्षस्य पत्रेषु वर्णत्रयं विशेषत:।
प्रत्येकस्माच्च वर्णात्तु स्वतन्त्रार्थ: प्रतीयते॥
भूमिं धूसरितो वर्ण: प्रकृतिं हरितं क्वचित्।
नीलवर्णोग्नितत्त्वं च द्योतयतीति मन्यते॥
सामरस्यं च शान्तिश्च मानवताप्रसंगत:।
योगप्रतीकचिह्नेस्ति योगस्य मूलमेव तत्॥

## तं वन्देलारनाथं च जगन्नाथं चतुर्भुजम्

अणसरावधौ भक्तै: जगन्नाथस्य दर्शनम्।
कर्तुं न शक्यते साक्षाद् विकल्पस्तत्र कल्पित:॥
श्रीचौतन्यकालादेषा प्रथा प्रत्ना प्रवर्तते।
तदानीं क्रियते भक्तैरलारनाथदर्शनम्॥
पुर्यां निवासकाले च श्रीचौतन्यमहाप्रभु:।
जगन्नाथमदृष्ट्वैव न च गृह्णाति भोजनम्॥
यदाणसरकाले स जगन्नाथस्य दर्शने।
सर्वथा विफलो जात: पानाशनेपि हातवान् ॥
त्यक्त्वा चान्नजलं भक्तो निराहारो यदोभवत्।
दृष्ट्वा भक्तस्य पीडां च देवोपि दु:खितो महान्॥
जगन्नाथस्तदा स्वप्ने भक्तवरं समादिशत्।
गत्वोलारपुरं वत्स! कुरुष्व मम दर्शनम्॥
ग्रामेलारपुरे गत्वा श्रीचौतन्यमहाप्रभु:।
साक्षादलारनाथस्य पपात पदयो: पुन:॥
भगवद्विरहाग्नौ च देह: सन्तापितो यत:।
प्रस्तरेणैव संयुक्त: प्रस्तरोपि द्रवं गत:॥
चौतन्यस्य शरीरं च साम्प्रतं प्रस्तराकृतौ।
स्पृष्ट्वा भक्ता: महत्पुण्यं लभन्ते सहजं क्वचित्॥
तं वन्देलारनाथं च जगन्नाथं चतुर्भुजम्।
शंखचक्रगदापद्मै: सुशोभितं च शाश्वतम्॥

## शीतत्वं पावनत्वं च गंगावद्धि हिमालये

ध्वज: संस्थापितश्छात्रै: संस्कृतस्य हिमालये।
हिमालयगुहास्वेव गुंजति संस्कृतो ध्वनि:॥
हिमालयोस्ति देवात्मा भारतात्मा च संस्कृतम्।
हिमवत्संस्कृताभ्यां च संस्कृतिर्न: सुरक्षिता॥
कालिदासस्य साहित्ये हिमालयोस्ति वर्णित:।
वर्णिता च महत्तोस्य पूर्णे संस्कृतवांमये॥
पादपेषु विशिष्यन्ते प्रोन्नता देवदारव:।
गुहाश्च तमसाच्छन्ना: कालिदासेन वर्णिता:॥
हिमावृतं घनारण्यं कस्य चित्तं न कर्षति।
तत्रत्यजनजातीनां यत्र दैनन्दिनी क्रिया॥
महौषधिप्रकाशेन हिमारण्यं प्रकाशितम्।
अतैलपूरदीपैश्च व्यवहारोत्र सम्भवेत्॥
तत्र लेखप्रसंगाश्च प्राकृतिकाश्च सर्वथा।
तत्रत्यैर्भूर्जपत्रेषु धातुरागैश्च लिख्यते॥
वासोस्ति देवतानां च देवभूमौ हिमालये।
देवभाषाप्रयोगोपि तत्र स्वाभाविको मत:॥
शीतत्वं पावनत्वं च गंगावद्धि हिमालये।
जयताद् हिमवांल्लोके देवभाषा च संस्कृतम्॥

## टीट्वेण्टीविजयाष्टकम्



-डॉ. अरविन्दकुमारतिवारी

आकाशे डयितुं खगेशगरुडं मीनं तरीतुं जले
दग्धुं शुष्कतृणं प्रचण्डमनलं वायुं प्रवातुं मुहु:।
सिंहं चाक्रमितुं वने कुलवधूं धातुं पदं चाङ्गणे
नान्य: शिक्षयतीह भारतदलं जेतुं क्रिकेटं बुध:॥ १

पूर्वं श्रीकपिलो गुरु: सुपदकं जित्वाऽनयद् भारते
तत्पश्चाद् विजयं महारणवरो धोनी महेन्द्रोऽहरत्।
गच्छत्सप्तदशाब्दरम्यसमये श्रीरोहितो मानद:
जित्वा तत्पदकं स्वभारतमहीमानं मुदातन्वते॥ २

कैचं दृश्यमसौ निगृह्य कठिनं श्रीसूर्यनामा प्रिय:
क्रीडाभूमिमहो सुखेन कृतवान् देवस्थलीं सौख्यदाम्।
क्रीड्यादेष युगं कुमारपदवीं सन्धारयन् बालक:
टीट्वेण्टीपदकं विजित्य सुखिनो मोदामहे बन्धव:!! ३

याते रोहितनायके झटिति हा धीरो विराट् कोहली
वीरोऽयं धृतवान् रणांगणगत: सेनापतित्वं ध्रुवम्।
सद्यो हन्त गतस्ततो नवयुवा पन्तो महाक्रीडक:
दृष्ट्वा कस्य मनोऽभवन्न सुहृदो दूनं महाक्रीडने॥ ४

क्रीडन् किन्तु सुखं स्वकीयवसुधा-पुत्रो विराट् धैर्यवान्
अर्जन् दुर्गमखेलने सहृदयोऽसौ धावनांकान् शनै:।
भाग्यान् मानमरक्षयद् दलगुरुर्गत्वापि दूरं बली
सन्यासीव महान् सदा विजयते मन्मानसे कोहली॥ ५

चेत: संहृतवान् द्रुतं बहुविधं श्रीमान् पटेलोऽक्षर:
जस्प्रीतो बुमरा सखा विजितवान् मन्ये हृदं मादृशाम्।
काले संहृतवान् जयं रिपुदलाद् धीमानहो हार्दिक:
पाण्ड्यायं भुवि राजतां युगयुगं कुर्मो वयं कामना:॥ ६

सर्वे सन्तु निरामया निजभुवो मानादिसंवर्द्धका:
क्रैकेटेऽनुदिनं मुहुर्विजयिनो राष्ट्रोत्सवाधायका:।
इत्थं कामयते स्वकीयवसुधा सालंकृता सर्वदा
सर्वान् नैजसुतानियं भगवती श्रीभारती धीधना:! ७

देशोऽयं सुखद: सदा विजयतां श्रीभारताख्यो मुदा
सर्वत्रैव न संशयो भुवि भवेत् नो धीमतां लेशत:।
राष्ट्रप्रेममहाधना: सहृदया: शृण्वन्तु सर्वेऽधुना
भायाद् भारतमानदस्तु विजयो दिङ्मण्डले भूतले॥ ८

टीट्वेण्टीविजयं लब्ध्वा संसृष्टमष्टकं बुधा:।
आरविन्दमिदं दृष्ट्वा प्राप्नुयु: सुखमुत्तमम्॥ ९

## विभाति



डॉ. जोगेन्द्रकुमार:
एसोसिएट प्रोफेसर
बी.एल.जे.एस. महाविद्यालय:
तोशाम: (भिवानी)हरियाणा

तरुणा विपिनं विपिनेन तरुस्
तरुणा विपिनेन विभाति धरा।
सरिता सलिलं सलिलेन सरित्
सरिता सलिलेन विभाति नग:॥

चुलुकेन कुवं च कुवैश्चुलुक'
चुलुकेन कुवेन विभाति सर:।
मसिना कलम: कलमेन मसि:
मसिना कलमेन विभाति कवि:॥

वशया पुरुष: पुरुषेण वशा
वशया पुरुषेण विभाति गृहम्।
पथिकेन पथश्च पथा पथिक:
पथिकेन पथा च विभाति पदम्॥

मधुपेन सुमं च सुमैर्मधुपो
मधुपेन सुमेन विभाति मधु।
पयसा खलु गौश्च गवा च पय:
पयसा च गवा च विभाति वपु:॥

गुरुणा च शिशुश्शिशुना च गुरु
'गुरुणा शिशुना च विभाति कुलम्।
विभुना पुरुष: पुरुषेण विभु
'विभुना पुरुषेण विभाति पुरम्॥

# उत्तरप्रदेशस्य अयोध्यायां ७५० कोटिरूप्यकैः निर्मास्यते विश्वस्तरीयः मन्दिरसङ्ग्रहालयः

अयोध्या- (डॉ युवराज भट्टराई) अयोध्यायां 750 कोटिरूप्यकैः विश्वस्तरीयः मन्दिरसङ्ग्रहालयस्य (भारतीयमन्दिरसङ्ग्रहालयस्य) निर्माणं करिष्यते। अस्मिन् सङ्ग्रहालये भारतीय संस्कृतेः उद्भवतः आरभ्य अधुना पर्यन्तानां वस्तूनां संयोजनं सङ्ग्रहश्च विधास्यते। टाटा संस कॉरपोरेट सोशल रिस्पांसबिलिटी (सीएसआर) फंड इत्याख्येन निधिना एतस्य निर्माणं कारयिष्यते, तत्रैव पर्यटनविभागस्य पक्षतः एतदर्थं 25 (एकड़) इति पञ्च विंशतिः प्रहलमिता भूमिः निः शुल्कं प्रदास्यते। पर्यटन-विभागः एक रूप्यकस्य लीज इति भाटके एनां भूमिं पूर्वं नवतिःवर्षेभ्यः पुनश्च नवतिःवर्षेभ्यः सम्प्रदास्यति ।



ध्येयमस्ति यत् मन्त्रिमण्डलेन मंगलवासरे अस्मिन् प्रस्तावे नैजं साहमत्यं प्रदत्तम् अस्ति।

प्रदेशे साम्प्रतिकेषु दिनेषु तीर्थाटनं धार्मिकं पर्यटनं च जवीयस्या गत्या प्रवर्धितम् अस्ति। अत्र आगम्यमानानां पर्यटकानां संख्या अतौपि वधितुं पर्यटनस्य अन्य-स्रोतांसि च समेधयितुं पर्यटनविभागः भृशं कार्यं कुरुते। एतस्मिन्नेव क्रमे तस्य पक्षतः भारतीय-मन्दिर-सङ्ग्रहालयस्य कार्ययोजना सज्जीकृतास्ति। पर्यटनमन्त्री जयवीरसिंहः प्रत्यपादयत् यत् मन्दिर-सङ्ग्रहालये भारतीयसंस्कृतेः उषाकालादेव समारभ्य आधुनिकसंस्कृतिपर्यन्तम् एकत्र एव समग्रमेव सूचनाविवरणं समुपलब्धं भविष्यति।

अत्र हि वेद-रामायण-मंदिर-पूजा-पद्धतिभिः साकं सम्बद्धानि प्रामाणिकानि वस्तूनि , तेषां उद्भवः, संस्कृतिः, लाभश्चेत्यादिविषये विस्तृतरीत्या ज्ञानवर्धकं विवरणम् उपलब्धं भविष्यति। अत्र यथा पौराणिकी सूचना भविष्यति, तथैव तासाम् 'आधुनिक वर्जन' इति आधुनिकीकृतं रूपमपि भविष्यति। अमुना प्रतिपादितं यत् 'राम की पैड़ी' स्थाने गुप्तार घट्टम् निकषा एतदर्थं 25 प्रहलमिता भूमिः टाटा समवायाय प्रदास्यते येन कार्यं शीघ्रं समारभेत।

टाटा सीएसआर फंड इति निधिः 650 कोटिकानि रूप्यकाणि आधारिकावस्थापनासंरचनासुविधासु व्ययं करिष्यति। असौ प्रावोचत् यत् अनेन युवजनाः, वैदेशिक-पर्यटकाः, भारतीयसंस्कृति-सभ्यतासु रुचिमन्तश्चान्ये पर्यटकाः अपि आकर्षिताः भविष्यन्ति। अमुना अग्रे प्रोक्तं यत् अयोध्यायां विश्वस्तरीय-मन्दिर संग्रहालयस्य निर्माणेन न केवलं अयोध्या एव प्रत्युत प्रदेशस्य अन्य-स्थलेषु अपि पर्यटनं वर्धिष्यति। एतेन प्रदेशे राजस्व वर्धनेन सहैव आजीविकानाम् नूतनाः अवसराः अपि उत्पत्स्यन्ते।

अत्र मन्दिरेण पूजापद्धतिभिश्च सम्बद्धाः सूचनाः वस्तूनि च स्थापयिष्यन्ते।

पर्यटनविभागस्य प्रमुखसचिवः मुकेशमेश्रामः प्रत्यपादयत् यत् सङ्ग्रहालये मन्दिरस्य पूर्णं स्वरूपं, दर्शनं, पौराणिककाले तस्य संकल्पना, पूजा नाम का? मन्दिरं कथमभूत् निर्मितम्, अस्य वैज्ञानिकः दृष्टिकोणः, अस्य विषये प्रामाणिकं विवरणादिकं भविष्यन्ति। युगपदेव समस्तस्य विश्वस्य मन्दिराणां प्रकाराः, आकाराः, तेषाम् आधुनिकं स्वरूपञ्चापि अत्र सुष्ठुतया प्रदर्शयिष्यते।

# आचार्यदेवकीनन्दनः योगभूषणपुरस्कारेण सम्मानितः जातः

डॉ.दिनेश चौबे, उज्जयिनी

उज्जयिनीस्थस्य महर्षिपाणिनिसंस्कृतवैदिक विश्वविद्यालयस्य योगविभागस्य तत्वाधाने दशम-अन्ताराष्ट्रीययोगदिवसस्यवसरे प्रातः ६:३० वादनतः विश्वविद्यालयपरिसरे समूहयोगाभ्यासस्य आयोजनं



जातम् । कुलगुरुः, सर्वे विभागप्रमुखाः, कर्मचारिणः, छात्राः च योगाभ्यासे भागं गृहीतवन्तः। तदनन्तरं सत्राध्यक्षेन कुलगुरुणा प्रो.विजयकुमारसीजी महोदयेन उक्तं यत् योगः भारतस्य प्राचीनदर्शनं वर्तते। साम्प्रतं योगस्य स्वीकृती सम्पूर्णे विश्वे अस्ति योगेन अस्माकं चित्रप्रवृत्तयः नियन्त्रिताः भवन्ति। पातञ्जलयोगदर्शनस्य चर्चां कुर्वन् महोदयः अवदत् यत् योगेन मनसः वाचा च शुद्धिः भवति। योगेन शारीरिकं मानसिकं च लाभो भवति। अस्मिन्नवसरे नगरस्य योगसाधकः देवकीनन्दनाचार्यः योगभूषणपुरस्कारेण सम्मानितः। प्रस्ताविकं योगविभागाध्यक्षा डॉ. पूजा उपाध्यायमहोदया कृतवती सञ्चालनं ईशापाटिदारमहोदया, आभारं डॉ. वरुणआहुजा अतिथिपरिचयं च तनिषामहोदया कृतवती कार्यक्रमे डॉ. तुलसीदास परोहा डॉ. उपेन्द्रभार्गवः डॉ अनिलमुवेल, डॉ. अजयराठी अन्ये शिक्षकाः छात्राः च आसन्।

# योग एकम् आध्यात्मिकानुशासनम् एवञ्च सूक्ष्मविज्ञानम्-डॉ. जयन्तनाथः

लखनऊ – विदेशात् समीचीनरूपेण अस्माकं समाजे आगतः योगः अस्माकं धरोहरः अस्ति। यदा विदेशात् योगः आगतः तदा जनाः तस्य महत्त्वं अवागच्छन्। अस्माकं मध्ये एषा परम्परा प्रचलिता वर्तते यत् यानि वस्तूनि विदेशात् आयान्ति तेषां वस्तूनां माहात्म्यम् इति। एतावता मानसिकसमस्या अस्ति तस्य औषधं नास्ति तथा च अस्मिन् स्पर्धायाः युगे अस्मिन् आधुनिकयुगे च केवलं योग एव तादृशः उपायः अस्ति येन शारीरिकीया मानसिकीया च समस्या गमिष्यति। उपरोक्तं वक्तव्यं उत्तरप्रदेशसंस्कृतसंस्थानेन सञ्चालितायाः ऑनलाइन-प्रशिक्षण-पाठ्यक्रम-निर्माण-योजनायाः अन्तर्गतं भाषा-शिक्षण-कक्षासु समायोजित-योग-विषयिन्यां गोष्ठ्यां गोरखपुर-नगरस्य नाथ-योग-प्रकृति-विज्ञान-विशेषज्ञेन डॉ. जयन्तनाथमहोदयेन प्रदत्तम्। अतिथेः स्वागतं, विषयोपस्थापनं अथ च अतिथेः परिचयात्मकं वक्तव्यं प्रशिक्षण- समन्वयकेन श्रीधीरजमैठाणिना प्रस्तुतम्।

प्रशिक्षकेन साध्वीनन्दनपाण्डेयेन धन्यवादज्ञापनं, दिवाकर- मणित्रिपाठिना कुशलतया मञ्चसञ्चालनम् ,शशिकान्तेन तकनीकीनियन्त्रणं , मंगलाचरणं मुकेशपाठकेन, संस्थानगीतिका खुशीशर्म्मणा एवञ्च विशिष्टसमायोजनं धनंजयमिश्रेण शचीकांतिपाठिना च कृतम्।

छात्रेषु सरस्वतीवन्दना प्रियया, गीताश्लोकान् रीतया, अनुभवकथनञ्च वैजयन्त्या, शान्तिमन्त्रः मीनाशाहेन च कृतः।

उल्लेखनीयं यत् एतत् सत्रं भाषाविभागस्य अपर मुख्यसचिवस्य आईएएस जितेन्द्रकुमारस्य (कार्यकारी अध्यक्षस्य) प्रेरणायां, माननीयनिदेशकविनयश्रीवास्तवस्य निर्देशने, प्रशासनिकाधिकारिणः दिनेशमिश्रस्य संरक्षणे मार्गदर्शने च सम्पन्नम्। एतत् सत्रं समायोजने- प्रधानसहायकस्य भगवानसिंहचौहानस्य नाम उलेखनीयम्।

यस्मिन् कार्यालयसहायकः शान्तनुमिश्रः, संयोजकः दिव्य रंजनः, राधाशर्मा, प्रशिक्षकाः एवं छात्रसहितसर्वेऽधिकारिणः च उपस्थिता आसन्। ऑनलाइनमाध्यमेन संचालिताः एताः जूनमासिकवर्गाः योगस्य महत्त्वं प्रकाशयन्तः सप्तप्रेरकसत्रैः समाप्ताः।संस्था प्रतिमासं आयोजितानां कक्षाणां माध्यमेन विविधाः संगोष्ठीः आयोजयति यासु गोष्ठीषु विषयविशेषज्ञाः शिक्षिकाणां स्वभाषणेन मार्गदर्शनं कुर्वन्ति।

# पाणिनिसंस्कृतविश्वविद्यालये द्विचक्रिकायात्राया आयोजनं जातम्'

डॉ.दिनेश चौबे, उज्जयिनी

3 जून विश्वसाइकिलदिवसस्यवसरे उज्जयिनीस्थस्य महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालये प्रातःकाले



द्विचक्रिकायात्राया आयोजनं जातम् । विश्वविद्यालयपरिसरे समुदायं सम्बोधयन् मान्यकुलगुरुणा प्रो. विजयकुमारसीजीमहोदयेनोक्तं यत् 'शरीरमाद्यं खलु धर्मसाधनम्' अर्थात् शरीर धर्मस्य आद्यं साधनं वर्तते। धर्मः, ईश्वरः, जीवनस्य वास्तविकं लक्ष्यं च शरीरस्य माध्यमेन एव प्राप्तुं शक्यते। अतः दैनन्दिनजीवने द्विचक्रिकायाः उपयोगः पर्यावरणप्रदूषणं निवारयितुं स्वास्थ्यं च सुदृढं कर्तुं लाभप्रदः भवति। समाजाय विशेषं सन्देशं दत्त्वा कुलपतिवर्यः जनान् प्रतिदिनं द्विचक्रिकायाः प्रयोगः कर्तुं, आह्वानं कृतवान्। यात्रायां डॉ. अखिलेशकुमारद्विवेदी, डॉ. उपेन्द्रभार्गवः, डॉ. संकल्पमिश्रः, डॉ. अनिलमुवेलः अन्ये प्राध्यापकाः छात्राः च भागं गृहीतवन्तः।


## पाठकानां कृते सूचना

**कृपया 'संस्कृत-संवादः' पाक्षिकवार्तापत्रस्य ग्राहकत्वं स्वीकर्तुम् आजीवनं सदस्यताशुल्कः- रु. २५००/-, पञ्चवार्षिकशुल्कः रु. ११००/- (संस्थादीनां कृते) द्विवार्षिकशुल्कः रु.४८०/- (व्यक्तीनां कृते) मनिऑर्डरः , चैकः, ड्राफ्टः, इत्यनेन 'संस्कृत-संवाद' इतिनाम्नः सम्पादकीयकार्यालये प्रेषयेयुः। अथवा अस्यां वित्तकोषसंख्यायां (A/C) शुल्कराशिः प्रेषयितुं शक्यते। वित्तकोषविवरणम्**

**Sanskrit samvad,**

**Current A/C No. 22490200000142,**
**Indian Overseas Bank, Yamuna Vihar,**
**Delhi-110053**
**IFC Code- IOBA0002249**

02.12.2006


# लोकसभा-निर्वाचिताः द्वाविंशति प्रतिनिधयः संस्कृतेन प्रतिज्ञानं स्वीकृतवन्तः


**अष्टादशम्यां लोकसभायां देशस्य द्वाविंशद्भिः नवनिर्वाचितैः संस्कृतानुरागिभिः सांसदैः भारतस्य आत्मभूतायां संस्कृतभाषायां शपथं गृहीत्वा आत्मानं, भारतं, संस्कृतं च गौरवन्वितं विहितम्। एतादृशानां सर्वेषामपि माननीयानां 'संस्कृतसंवादष्पक्षतः हार्दिकं अभिनन्दनम्।**



सुश्री बाँसुरीस्वराजः देहलीप्रान्तः


श्रीमती संध्याराय: भिण्डः (म.प्र.)


श्रीमती लतावानखेडे सागरः (म.प्र.)


श्री जनार्दनमिश्राः रीवा (म.प्र.)


श्री राजेशमिश्राः सीधी (म.प्र.)


श्री रोडमलनागरः राजगढ (म.प्र.)


श्री महेन्द्रसोलंकीः देवास (म.प्र.)


श्री गजेन्द्रसिंहपटेलः खरगोन (म.प्र.)


श्री दुर्गादासउइकेः बैतूल (म.प्र.)


श्री दिलीपसैकियाः असमप्रान्तः


श्रीचिन्तामणिमहाराजः छत्तीसगढ़म्



संकलनः-डॉ.श्रुतिकान्तपाण्डेयः


श्रीसतपालब्रह्मचारी:(कांग्रेस) हरियाणा



डा.हेमांगजोशीः गुजरातम्


श्री देवुसिंहचौहानः गुजरातम्



श्री अरुणगोविलः मेरठ (उ.प्र.)


श्री साक्षीमहाराजः उन्नाव (उ.प्र.)



डॉ. महेशशर्माः गौतमबुद्धनगरम् (उ.प्र.)


डॉ प्रतापचंद्रषडंगीः बालासोर (उड़ीसा)


श्रीपदनैकः गोवाः


डॉ. मन्नालालरावतः असमप्रान्तः


श्री कष्णप्रसादटेन्नेटी आन्ध्रप्रदेशः


श्री विश्वेश्वरहेगडे उत्तरकर्णाटकम्ः

## आचार्य उमेशभट्टः स्वमौलिकग्रन्थं ९०० पृष्ठात्मकं पूजापद्धतिहस्तलिपिं व्यरचयत्

देहरादूनम् (धीरजमैठाणी) - देव भूमि उत्तराखंडः गंगा, यमुना, भागीरथी, अलकनंदा , मंदाकिनी इत्यादिभिः पतित पावनी नदिभिः परिवृत्तः चर्तुर्धामभिः गंगोत्री यमुनोत्री, केदारनाथ, बद्रीनाथ इत्येभिः



समन्वितः। यत्र पौराणिकेषु तीर्थस्थलेषु अनेकेषां विदुषाम् आविर्भावः समये समये जायते । ये सनातन धर्मस्य आध्यात्मिक चेतनां स्वमौलिक रचनया जागृता कृत्वा भ्रांत समाजाय मार्गदर्शनं च विदधति । राज्यस्य रुद्रप्रयाग जनपदान्तर्गतस्य नागपुर क्षेत्रस्य भट्टगांव वास्तव्यः स्वर्गीय श्री ब्रह्मानन्द भट्टस्य सुपुत्रः संस्कृत महाविद्यालय मायकोटी, जिला रुद्रप्रयागस्य प्रधानाचार्यः प्रखर कथा वक्ता संस्कृत विद्वान्, कर्मकांडी, संस्कृतज्ञानगङ्गाप्रतिरूपः आचार्य उमेश चंद्र भट्टः स्वेन समुत्कृष्ट उद्यमेन हस्त लिखितस्य पूजा पद्धति हस्तलिपि नामकस्य ग्रंथस्य रचनां कृतवान् । यश्च विद्वत्समाजे चर्चाविषयः विनिर्मितो जातः । अस्य विदुषः लेखन्या संकलित ग्रंथ द्वारा तदीयं श्रौतस्मार्त कर्मणि निष्णातत्वं वैदिक विधानां लाक्षणिक वैदुष्यं परिलक्षते।

श्री स्वामी 108 सच्चिदानंद संस्कृत महाविद्यालय वेद भवन रूद्रप्रयागस्य प्रधानाचार्यः आचार्यशशिभूषण बमोला देहरादूनम् आगत्य उत्तराखंड विद्वत् सभायै उक्त ग्रन्थस्य प्रतिं सस्नेहं प्रदत्तवान् सभायाः महासचिवः आचार्य दिनेश भट्टः तदीयम् अभिनंदनं आभारं च अभिव्यक्तीकृतवान। लेखकस्य आचार्य उमेशभट्टस्य उद्यमं च प्रशंसितवान् । सभा द्वारा प्रकाशित वार्षिक पत्रिकायाः गायत्री विशेषांकं प्रदत्तवान्। अवसरेस्मिन् आचार्य चंद्रमोहन थपलियालः , भूतपूर्वः महासचिव चंद्रप्रकाश ममगाईवर्यः च उपस्थितौ।

सभाध्यक्षः विजेंद्र प्रसाद ममगाई स्वीये संदेशे आचार्य उमेशभट्टं प्रति प्रणमांजलि पूर्वकम् आभारं व्यक्तीकृत्य उक्तवान् उत्तराखंड विद्वत् सभा भवत्सदृशाणां शास्त्रानुशीलनतत्पराणाम् उद्यमिनां विदुषां मार्गदर्शनम् आकांक्षते । सद्यः भवदीयाय प्रकाश्यमान ग्रंथाय हार्दिक्यः शुभकामनाः। सभायाः संरक्षक मंडलं, पूर्ववर्तमान पदाधिकारिणः, कार्यकारिणी- आजीवन सदस्याश्च ग्रन्थममुम् अभिनन्दितवन्तः। ध्यातव्यं यत् स्नेहेन प्रदत्तः ग्रंथः सभायाः प्रपत्रेषु स्थापयिष्यते। ग्रंथस्यास्य 900 पृष्टेषु अन्याः प्रतयः प्रकाशयिष्यन्ते।

## बालभारतीपब्लिकविद्यालये समायोजितः अलंकरणसमारोहः

वार्ताप्रेरकः - सौरभः दे

ओडिशा, एनटीपीसी दर्लिपालि - जूनमासे नवविंशतिदिनाङ्के (२९/०६/२०२५) भव्यरूपेण अलंकरणसमारोहः समायोजितः। अस्मिन् कार्यक्रमे मुख्यातिथयः आसन् - श्रीमन्तः हर्षनाथः चक्रवर्तीमहाभागाः( HOP, NTPC, DARLIPALI) विशिष्टातिथयः आसन् - श्रीमती प्रतिभा सिं महाभागाः(HO-HR




NTPC, DARLIPALI)।एतान् अतिथीन् पुस्पैः स्वागतं कृतवती विद्यालयस्य प्रधानाचार्याः श्रीमन्त्यः नीरजा तिवारी महाभागाः। अलंकरणसमारोहनिमित्तं लिखितपरीक्षा, वाचिक - परीक्षाद्वारा निर्वाचितान् छात्रान् आहुतवन्तः। एवं प्रकारेण विद्यालयस्य कप्टानः - मान्यता दाशः। सह-कप्टानः-राजश्री प्रियदर्शी। क्रीडाकप्टानः -आदित्यकुमार:सिंः। अनुशासनकप्टानः-शुभस्मिता बेहरा। सांस्कृतिक -कप्टानः -आद्याशा सोरेन। साहित्यिककप्टानः -सौरेश मिश्रः। एतैः साक आसन् चत्वारः 'हाउस' (House )। यथा - अग्निहाउसप्रधानः - संग्रामः, पृथिवीहाउसप्रधानः - ओजसः, वायुहाउसप्रधानः -नन्दिनी, जलहाउसप्रधानः - निगमः। एतेषां शपथग्रहणपाठं पाठयितवती विद्यालयस्य प्रधानाचार्याः।परं मुख्यातिथिः विशिष्टातिथिः च स्वभाषणेन छात्रान् उत्साहितवन्तः। समारोहकार्यक्रमे विद्यालयस्य अन्ये शिक्षकाः शिक्षिकाः च उपस्थिताः आसन्। उपस्थिताः आसन् छात्राणां मातापितरौ।अन्ते जातीय संगीतेन अनुष्ठानस्य समाप्तिः घोषितः।

अस्माकं प्रेरणास्रोतः- स्व.पं०रामकिशोरशर्मा, स्व.पद्मश्री डॉ.रमाकान्तशुक्लः
परामर्शकाः-डॉ.बलदेवानन्दसागरः, डॉ.अरविन्दकुमारतिवारी, डॉ.राधेश्यामअवस्थी, प्रो.(डॉ.)अजितकुमारजैनः
सम्पादिका-मञ्जूशर्मा, सम्पादकमण्डलम् - डॉ.सुन्दरनारायणझा, डॉ.सुरेन्द्रमहतो, डॉ.विमलेन्दु कुमार त्रिपाठी, डॉ.संदीपकुमार उपाध्याय, धीरजमैठाणी, प्रबन्धसम्पादकौ-वेदप्रकाशशर्मा, नेहाशर्मा च,

स्वत्वाधिकारिण्या, मुद्रिकया, प्रकाशिकया सम्पादिकया च मञ्जूशर्ममहोदयया लक्ष्यप्रिंटर्स,521/8 बी, भूतलं , वितिका सं. - 14, आदर्शमोहल्ला, मौजपुरनगरम् , देहली-53तः मुद्रापयित्वा ए-2/32, वजीराबादमार्गः भजनपुरा, देहली-53 इत्यतः प्रकाशितम्।
दूरभाष : 09311086751 ई-मेलः sanskritsamvad@gmail.com, RNI No. : DELSAN/2011/38660 DL(E)-20/5534/2021-23 केन्द्रीयसंस्कृतविश्वविद्यालयः नवदेहली अनुदानेन प्रकाश्यमानं पत्रमिदम्।